सेनःकथंतत्रयास्यतिदारुकावनं तैषधेसुंदरेदेशेदक्षिणार्णवपरः महासेनसुतोवी
रसेनश्चैवतमुप्रिय ॥ पार्थिवेनतनंत्वात्वातपःपरमदुष्करं चकारवीरसेनोवैवर्षाणांद्वादश
वधिंतःप्रसन्नोदेवेशःप्रत्यक्षेप्राहशंकरः कांक्षितंवांछितंत्वत्तोवृणुष्वतुविलंबनं ॥
विधायसेनयायोचदास्यामिवीरसेनकः तान्गृहीत्वाप्रविष्येतांराजनसत्रजाधुना ॥ अन्येच
स्त्रीस्वरूपावैनविष्यंतीवनेमुनाः एकश्छत्रंगत्वाचविवरेचस्थितेनया ॥ प्रविष्टश्चतदाद्वारो
त्वानागेश्वरस्यच ॥ ततःपाशुपतेप्राप्यत्वाचरुद्रोसुखान्न पार्वत्याश्चबजेचैवसंपूर्ण
चनविष्यति ॥ मायिदृष्टेतदाकिंचन्मूनेतेनचविष्यति ॥ इतिदत्तोवरःसोपिशिवेनपरमात्मना ॥ ना
नाःसर्वेतदाकर्तुंनविष्यतिनसंशयः एवंनागेश्वरोदेवोह्युत्पन्नोज्योतिरूपतः ॥ एवंयःपठे

राम
१४८

एद्याचित्तंनरस्यैकाग्र्यंकरेनरः सर्वदापैःप्रमुच्येतनात्रकार्याविचारणा ॥ अतःपरंप्रवक्ष्यामि
लिंगंनागेश्वरस्यच ॥ उत्पत्तेश्चयथापूर्वंतथाचकथयाम्यहं ॥ इतिशिवपुराणेनागेशनिरूप
णाध्यायः ६१ ॥ सूतउवाच ॥ श्रूयतांमुनयःश्रेष्ठाःमाहात्म्यंकरस्यच कदाचिद्ग
घोदेवोत्तरस्यांदिशिमुनीश्वराः सुग्रीवप्रमुखैर्धीरैर्वानरैर्बलवत्तरैः पंचरुद्रादशाख्यैश्चययौ
तीर्थयोनिधेः दक्षिणेसागरेयोवैदर्भपत्तनवणाकरः तत्रगत्वास्वयंरुद्रोवेलायांसंस्थितोयदा
वानरैःसेव्यमानस्तुतस्तुष्टेनतथैवच ददौज्ञानंकृतोयातःकदाचिद्यंत्रिलिष्यति ॥ अगाधंस
मरंतोयंसेतुंवानरसाधनं राक्षसोरवणोजेतानज्ञानेकिंनविष्यति रत्येवंवैविचार्यैवतारे
स्थितासतत्स्तुतः ॥ आश्वस्तोवानरैःसर्वैरंगदादिपुरःसरैः उवाचराघवस्तत्रबधानंतदिशो
दृशा नीत्वाजलंसमाजग्मुःप्रतीपस्थिताःपुरः जलंचगृह्यतोस्वामीनसमानीतेत्वदाज्ञया त
जलंचसमानीत्वापुनारब्धवानयदा तदाचस्मरणंजातेनकृतेदर्शनंमया शिवस्यवानरंत्रे

श्रीसूत उवाच अथ कथं च गण्यते जज्ञे स्तुत्वा च नत्वा ते पुत्रो रावणेन परमात्मना पश्चाच्च पार्थिवो पूजां चकार
रघुनंदनः आवाहनादिकादीश्चोपचारान्प्रकल्प्य च प्रणिपातैस्तवैर्दिव्यैः संतोष्य शंकरं पुनः॥
प्रार्थयामास देवेशं शिवः शिवकरं तदा स्वामिन्नूनं नगाधीशवरदासोऽतिवत्तरः वानरेण
बलेनैतत्त्वं चलेयुद्धसाधने तस्माच्छीघ्रं तमाकार्यं समर्थं मम सुव्रता त्वदीयो रावणश्चैव पु
र्जयो सर्वथा नृभिः पुरेऽपि तपतो वै त्वया कार्यं सदा शिव इत्येवं च नमस्कृत्य प्रकल्प्य च पुनः
पुनः जय जयेति दण्डौघैः शंकरेति च इति स्तुत्वा शिवं तत्र ध्यानपरायणः पुनः पू
जां तदा त्यक्त्वा गद्गदं नादयन्यदा करे तदा चलं करोदेवो ज्योतिरूपो महेश्वरः सांगः सपरिवारश्च
यथोक्तरूपमुत्तमं धृत्वा च प्रकटीभूय शिवं स्तुत्वा तदाब्रवीत तद्रूपं च तदादृष्ट्वा सर्वे पूजां तदा
स्वयं कृतवान्रघोदेवो शिवधर्मपरायणः स्तुतिं च विविधां कृत्वा प्रणिपत्य शिवं तदा जयं रात्र
च प्रार्थयामास जयो स्तु पुनरब्रवीत शिवदं ते जयं प्राप्य त्वनुज्ञां सत्तमा च पुनश्च प्रार्थया १४९

मास देवेशं यत्त्वया मनो लोकानुपकारार्थं पावनाय शिवत्वया स्तुतनः शिवस्तत्र लिंगरू
पोऽनवत्तदा रामेश्वरश्चनामा वै त्रसिद्धो जगतीतले इतिवश्च समाख्यातं श्रुत्वेतत्पापहारकं
॥ इतिशिवरहस्ये रामेश्वरमहिमानिरूपणाध्यायः ॥ ६२ ॥ सूतउवाच अतःप
रं च युष्मभ्यं ज्योतिर्लिंगमुदाहृतं तस्यैव सुमहत्त्वं च श्रूयतां ऋषिसत्तमाः दक्षिणस्यादिशिश्रेष्ठाः
गिरिर्देवविसंज्ञितः तस्यैवनिकटेकश्चिज्जारराजकुलोद्भवः सुधर्मानामविप्रश्च सर्वदाश्रुत
वित्तमः तस्यप्रियासुदेवाचसाध्वी धर्मपरायणः सुधर्मा च द्विजश्रेष्ठो देवतातिथिपूजकः वेदमार्ग
परो नित्यमग्निसेवापरायणः त्रिकालसंध्ययायुक्तः सुरूपसमन्वितः शिष्याणांपाठकश्चैव वे
दशास्त्रविचक्षणः धनवांश्चपरोदातासौजन्यगुणभाजनः आयुर्वर्षशतीतायतस्य धर्मप्रकुर्व
तः पुत्रश्चनाभवत्तस्य दुःखदः स्यादफलस्त्रियः तेनदुःखेनतेनैवतस्तानैकचेतसः आत्मना
त्मनिनिर्लोभाः सृतेकर्मप्रसंगमन इत्येवं मनसिधृत्वा नदुःखंतवातदा सुदेवाचतदादुः

खं च कारपुत्रसंभवं ॥ नित्यं च स्वामिनं सा वै सर्वथा यत्नतां कुरु ॥ सोपि स्त्रियं तदा भर्त्सयन् किं ते पुत्रं
करिष्यति ॥ का माता कः पिता पुत्रः कोयं बंधुश्च प्रियकः ॥ सर्वं स्वार्थपरं देवि जानीहि त्वं न संश
यः ॥ तस्माद्देवी त्वया दुःखं त्यजनीयं सुनिश्चितं ॥ नित्यं मह्यं त्वया नैव कथनीयं शुभव्रते ॥ एवं तां सं
निवार्यैव भगवद्धर्मतत्परः ॥ आसीत्परमसंतुष्टो द्वंद्वदुःखं समत्यगात् कदाचिच्च गेहे च सहवा
सिनः ॥ जगाम प्रियगोष्ठ्यर्थं विवाहस्तत्र संगतः ॥ तत्पत्न्या स्त्रीस्वभावाच्च भर्त्सिता सा तदा तया ॥ पु
त्रीणि त्वं कथं गर्वं करोषि पुत्रीणि ह्यहं ॥ मद्धनं मोक्षते पुत्रं ते धनं कश्च भोक्ष्यति ॥ राजा हरिष्यते
पुत्रैर्नूनं धिक्मानं ते हि विंध्यके ॥ तया च भर्त्सिता सा वै ग्रहमागत्य दुःखिता ॥ स्वामिनं कथयामास
तदुक्तं कथमादरात् ॥ ब्राह्मणोपि तदा दुःखं न चकार सुबुद्धिमान् ॥ कथितं कथ्यतामेव यद्भावित
द्भवेत् प्रिये ॥ इत्येवं च तदा तेन ह्याश्वतापि पुनः ॥ न तत्याज तदा दुःखं ह्याग्रहं कृतवंत्यसौ ॥ य
था तथा तयः पुत्रः समुत्पाद्य प्रियोसि मे ॥ अन्यथा च त्यजिष्यामि देहं देहभृतां वर ॥ एवमुक्तं त

याश्रुत्वा ब्राह्मणश्चिंतया युताः ॥ युता अग्रे तदा क्षिप्तं पुष्पद्वयमतंद्रितः ॥ मनसि दक्षिणं पुष्पं
धृतं पुत्रफलप्रदं ॥ एवं कृत्वा स्वपत्नीं च उवाच ब्राह्मणस्तदा ॥ अनयोरेकतरं ग्राह्यं त्वया पुष्प
फलाप्तये ॥ त्वया च मनसि धृत्वा पुत्रश्चैव भवेन्मम ॥ तदा च स्वामिना यच्च धृतं पुष्पं समेष्यतु
इत्युक्त्वा च तया तत्र नमस्कृत्य रविं तदा ॥ नत्वा चाग्निं पुनः प्रार्थ्य गृहीतं पुष्पमेकतः ॥ भर्त्रा यच्चिंति
तं सूनुं न तया तत्र वै धृतं ॥ तं दृष्ट्वा पुरुषश्चैव निश्वासपर्यमोचयत् ॥ निर्मितं चेश्वरेणैव अ
न्यथा तत्कथं भवेत् ॥ आशां त्यज प्रिये त्वं च परिचर्यां हरेः कुरु ॥ इत्युक्त्वा च स्वयं विप्र आशां परि
विहाय च ॥ धर्मकार्यरतः सोपि भगवद्ध्यानतत्परः ॥ इयं चैवाग्रहं नैव मुमोच पुत्रकाम्यया ॥ मयि
पुत्रो न चास्त्येव ह्यन्यां कुरु मदाज्ञया ॥ तस्यां च भविता पुत्रो नात्र कार्या विचारणा ॥ तयैवं प्रार्थि
तो विप्रो ह्युवाच स्वप्रियां तदा ॥ त्वदीयं च मदीयं च तदा दुःखं गतं ध्रुवं ॥ तस्मात्त्वं धर्मविघ्नं च
मा कुरु सांप्रतं प्रिये ॥ इत्येवं वारिता सा च स्वभ्रातुः पुत्रिकां तदा ॥ कन्यां चानीय भर्त्तारं वृणु

ब्रह्मोवाच ब्रह्मलोवाच इदानीं यदसित्वं च मेघिये यंततः पुनः पुत्रसुख्ययदा
स्यादैतदास्यर्द्धकरिष्यति सुकासावचस्तत्र नगनीचतयापरं सेवनीयाकृतिला साधु
रमानामीचचातृजाकरिष्यानिसंदेहोत्वयाकार्यसुनिश्चितं इत्येवंप्रार्थितः सोवैचचा
लयहातप्रियः परिणम्यततस्तोतुत्वदीयामितितोपुनः प्रार्थयामासधर्मात्मायंपोष्यात्व
यानघेऽनेवंचचकारसुधर्मसंयुतमानसः साचाविभ्रातपुत्रीचदासीवत्यर्थंचर्यत
कृतिलाचैवयापत्नीस्वाम्यनुज्ञानवाप्यच पार्थिवान्साचेकारसुतित्यक्तेकोत्रसंशये वि
धानपूर्वकंतत्रसुपचारसमन्वितेरत्येकाग्रात्क्षिप्तत्रतटाकेनिकटेस्थिते विपर्यपुनरा
वाहपूजांकृत्वाविधानतः एवंजातेतदाकालेविगतस्तत्समनरत्तदा कृपयाचशिवस्यैवपुत्र
स्तस्यसमजायत सुंदरःसुनगश्चैवकल्याणगुणभाजनः तंदृष्ट्वापरमःप्रीतोब्रह्मलोकंगतस्वि राम
तमः अनासक्तःसुखंनेजेज्ञानधर्मःपरायणः सुदेवातवतस्मैतुस्वर्द्धचैवचकारसा अथ १५१

मेशीतलंतस्याहृदयंसमजायत तदनंतरंचयकातेश्रूयतोद्भविसत्तमाः पुत्रंदृष्ट्वाकृतिलाया
ज्येष्ठादुःखमुपागता सूतउवाच सर्वेपुत्रप्रसुतत्रासंसंचनिरेतरं नसह्यस्तयातया
तेचरूपंचैवशिलोरथ सुप्रियेजनयंदृष्ट्वाहृदयंचाग्निसंयुतं एतस्मिंतत्समयेविप्राः कन्यादातृ
समागता विवाहंतस्यतत्रैवचकारविधिवन्मुदा सुधर्मधुरमासाद्यानंदंपरमंगतः सर्वसं
बोधनस्तस्यधुरमयामासमानसादधुः तंदृष्ट्वाचसुदेवाचमनसिलज्जितातदा अहोनेत्यसुधर्माचव
धूंपुत्रेमुनीश्वराः उसंगेदर्शयामासप्रियाजारूर्षयन्निव विनैचहर्षतोधुरमासुदेवदुःखमा
गता अहेचलंतोसंतोक्ववधूंपुत्रंसदेदिका अयंतदुःखमापन्नाकृतास्मिंदापतत धुरमा
हृदद्धधुश्चेयंत्वदीयानमदीयका पुत्रश्चैववधूश्चैवज्येष्ठायातवनात्यधा जन्मज्येष्ठंतदानै
नंतथैवचकृतिष्टका तथापिचतदाज्येष्ठ्यंतस्यजवनीश्वरत तदाविचारयामासदुःखमूलंकि
यंनवेतमदीयोहृदयाग्निश्चधुरमानेत्रजलेनच शमंतोजविष्यतितदानात्यथाशांतिमाप्नुयात्ए

नेचमारयाम्यद्यसुप्रियेप्रियवादिने॥ अन्येनाविज्ञवेदेवनिश्चयेपरसंगता॥ कदर्याएवविचारश्च
रुतात्रतेनवेनहि एकस्मिन्दिवसेप्राप्तेसुतंपुत्रेवधूयुतं॥ छेदयामासचाग्नेयुरलीत्वाख
लुपुत्रको॥ सर्वांगरक्तमादायरात्रौसुप्तेप्रजापति॥ यत्रस्त्रिग्नानिलिंगानिपुरुषस्यानित्यमेव
च॥ तत्रस्त्रिग्नासमायातासुप्तापसुप्ततांगता॥ प्रातःकालेवसुस्नायपुत्रानित्यंतदाकरोत्॥ सु
धर्मंचस्वयंश्रेष्ठोनित्यकर्मसदाकरोत॥ स्नानादिकंतदातौचकृत्वानित्यंचचक्रतुः॥ एतस्मि
न्नंतरेसाचश्रेष्ठाःकार्यंतस्यचचकारतेदयुक्ताचस्त्रग्भेःशोभितंविष्यति॥ प्रातःकाले
समुत्थायवधूःश्रेष्ठाविलोक्यच॥ रुधिरंशय्यादेहखंडैर्युक्तंदुःखमुपागताः॥ स्वश्रुतिंवेदयामा
समपुत्रस्तेचकुलेजनः॥ श्रुत्वाचरुधिरंशय्यांदृष्ट्वतेदेहखंडकः॥ हतास्मिहतोकेनदुष्टकर्म
रुतःपतिः॥ त्वेकदुःखंतदापन्नाहतास्मिकिलेतिच॥ दुःखंचकारसातत्रमनसाहर्षमाग
ताः॥ पुत्रमाचापितंतत्रावधादुःखंनिशम्यच॥ नचचालत्रतान्नस्मान्नित्यंपार्थिवपूजनात्

मनश्चैवोसुकृतैवज्ञातेतस्यापुनीश्वराः॥ नर्तापिचतथैवासीद्यावद्धिधिव्रतंजवेत॥ मध्या
ह्नेचैवसंजातेदृष्ट्वाभार्य्यांचयावलं॥ तथापिचतयातत्रहतेदुःखंपुनीश्वराः॥ येनैवचार्पितश्चा
यंसेवरस्तोकरिष्यति॥ यदिनरक्षितोचैवईश्वरःप्रभुरेवसः॥ अत्रैवचिंतयानेनकिस्यात्क
त्यविचारणं॥ साध्वीकारुदतीसौवैज्ञीवंयुक्तंनिवेदयत्॥ सुकृतानचकारैवपुत्रादुःखद
मप्रियं॥ पार्थिवोश्वगृहीत्वावैज्ञगामसरसंतटे॥ स्त्रिग्धाचपार्थिवीतत्रपर्यवर्त्ततसा
ततदा॥ ततदापुत्रतज्ञगस्यदृष्ट्वतेसमतटेतदा॥ पुत्रोवाच॥ मातरेहिनिलिंगानिमृतस्य
जीवितोह्यहं॥ तेदृष्ट्वाहर्षितानैवदुःखितानपुरायथा॥ तदाशिवश्चसंदृष्टोज्योतिरूपोमहेश्व
रः॥ प्रसन्नोस्मिवरंब्रूहिज्येष्ठयाप्रार्थितोह्ययं॥ नोचमारयिष्यतिनित्यंनेनवरानने॥ पुत्रा
चेनंवरंवव्रेरक्षणीयास्वसामम॥ शिवोवाच॥ अपकारःकृतस्तुभ्यमपकारःकथं
त्वया॥ क्रियतेदननीयाचपार्थिवदुःखकारिणी॥ पुत्रोवाच॥ तवदर्शनमात्रेणपा

तकं नैव तिष्ठति ॥ इदानीं चैव त्वां दृष्ट्वा पापं तद्भस्मसाद्भवेत् ॥ अपकारेषु यश्चैव ह्युपकारं करोति
च ॥ तस्य दर्शनमात्रेण पापं दूरतरं व्रजेत् ॥ इति श्रुत्वा मया देव भगवद्वाक्यमुत्तमं ॥ तस्माच्चे
यं कृतं येन क्रियतां च सदाशिव ॥ इत्युक्ते च तया तत्र प्रसन्नः पुनरेव सः ॥ अन्यच्च व्रीयतां घुश्मे
ददामि च हितं तव ॥ सोवाच वचनं श्रुत्वा यदि देयो वरस्त्वया ॥ लोकानां चैव रक्षार्थं त्वया स्थेयं
सदाशिव ॥ तदोवाच शिवस्तत्र तव नाम्ना सुमध्यमे ॥ घुश्मेशं सुप्रसिद्धं वै नाम मे जायतां शुभं ॥
इदं सरस्तु लिंगानामालयं स प्रजायत ॥ तस्माच्छिवालयं नाम प्रसिद्धं भुवनत्रये ॥ तव वंशे शतं
चैकं वर्द्धते पुरुषाः शुभे ॥ ईदृशाः पुत्रका वंशे भविष्यति न संशयः ॥ साग्निकाः सधनाश्चैव ह्या
युष्मंतो विचक्षणाः ॥ विद्यावंतो ह्युदारश्च भुक्तिमुक्तिफलायते ॥ शतमेकोत्तरं चैव भविष्यंति गु
णाधिकाः ॥ ईदृशो वंशविस्तारो भविष्यति सुशोभना ॥ इत्युक्त्वा च शिवस्तत्र लिंगरूपो भवत्तदा
घुश्मेशो नाम विख्यातो सरश्चैव शिवालयं ॥ सुधर्मा चैव घुश्मा च सुदेहा च शिवस्य च ॥ शत

मेकोत्तरं चैव परिक्रम्य तथैव च ॥ प्रदक्षिणां शिवस्यैव कारयामासतुस्तदा ॥ पूजां कृत्वा समाश्वा
स्य मिलित्वा च परस्परं ॥ हित्वा चांतर्मलं तत्र सुखं चलेभिरे हिते ॥ ईदृशं चैव लिंगं च दृष्ट्वा पापैः प्र
मुच्यते ॥ सुखं संवर्द्धते नित्यं शुक्लपक्षे यथा शशी ॥ इति ते च समाख्यातं लिंगानां कारणं मया ॥
ज्योतिषां यानि लिंगानि कथितानि मया श्रुतं ॥ यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवः क्षणात् ॥ इति
श्रुत्वा वचस्तस्य सूतस्य च मुनीश्वराः ॥ ऊचुस्तस्मै पुनस्तत्र लोकानां हितकाम्यया ॥ ॥ ऋषय०
अन्यान्यपि चरित्राणि शिवस्य परमात्मनः ॥ कथयत्वं प्रसादेन न तृप्तावयमेव च ॥ चरित्रं च
शिवस्यैव कृत्वा तृप्तिर्न जायते ॥ तस्मात्त्वं च विशेषेण ध्यात्वा देवं परं मुदा ॥ कथयस्व महाबा
हो हिताय जगतामिह ॥ ॥ इति शिवपुराणे ज्योतिर्लिंगनिरूपणाध्यायः ॥ ६३ ॥ ॥ सूत उ०
श्रूयतां ऋषयः श्रेष्ठाश्चरित्रं परमात्मनः ॥ आकाशस्य च ताराणां भूमेश्च रेणूनां तथा वृष्टे
रासारकाणां च बहुकल्पैः कदाचन ॥ संख्या विशक्यते कर्त्तुं गणानां न शिवस्य च ॥ तथापि च य

याबभ्याकथयामियथाऽऽकर्तंतस्मिंस्त्वयदाऽऽकृतः।कोधाच्चविरतोनहितदाग्निवेनदेवानां
हितार्थंरूपमऽऽनेमगरंजेचधर्तेतत्रनदृष्ट्वाजीवतोंगतःशिवाऽऽद्यंचसंप्राप्यसर्वेत्रस्थंति
वैततः॥ऋषयऊचुः॥चरितेतुनस्मिंस्त्वयकर्मदस्मिंसुव्रत॥सूतउवाच॥त
त्तस्मादृषिंसमुत्पन्नायुद्धमिच्छामुनीश्वराः॥कोनलेनमारीरेणकथयुद्धंचिरंभवेत्स्तुतेप्र
ब्रूणष्वऽऽदर्शयिष्यामिसुव्रत॥एकस्मिन्दिवसेविष्णुर्विचारतत्परोनवेत्॥केनयुद्धंप्रक
र्त्तव्यंमयाचैवविचार्यच॥जयश्चविजयश्चैवकुमारैःसूचितोयदा॥तेषांकोजाऽऽतेजाते
भगवान्वाक्यमब्रवीत्॥त्वागतंदारपालौचकुमारावूचतुःपुनः॥अयुद्धंचदृढंसर्वजातं
वैवान्यथाचवेत्॥कुमारावूचतुरेवाऽऽनयुद्धंहोरमेमुनाः॥त्रिभिर्जन्मभिरस्माभिस्त्रिजिस्तथावैरजावपि॥दंडाऽऽनंचतदातैस्तुविचार्यशीघ्रंततः
यथेच्छाचरतेरासीद्दृढंतेनाऽऽयंतथापुनः॥त्रिभिरेवावतारैश्चवैरजावेपितद्धरं॥स्तुत्वाकांपति

तौतत्रकश्यपस्यऽऽरेतदाहिरण्यकशिपुश्चैवहिरण्याक्षोमहाबलः॥अवतीर्णौचदैत्यो
त्तौमहासिद्धौचमहाबलौस्वयंचैवनसिंहश्चकुमारनक्रिसंयुताः॥प्रह्लादादितदाजाताप्र
जास्तेपिसुमार्गजाः॥रावणःकुंभकर्णश्चतावेवचबभूवतुः॥रामश्चैवनसिंहश्चकुमारश्च
तदाभवत्॥विभीषणःपरश्चैवतैश्चैवपुनरेवच॥शिशुपालोदंतवक्रोभगवद्द्वेषतत्परौ॥द
मघोषऽऽरेतत्रऽऽवतीर्णौबलाधिकौ॥जानौतौचतदासूतौवामनकाद्याःकुमारकाः॥चरि
त्रंतुनसिंहस्यऽऽश्रयतांपापहारकं॥हिरण्याक्षोबलाच्चैवक्रीडार्थंसूयमानयत्॥सिंहंदं
तैश्चैवऽऽसह्यवेलयत्तदादेवानांऽऽसनंतदाभूवीमारुहत्तदा॥मुखेधृत्वाचतांसो
पिस्तापुरेपिष्ठिपंकायथागतोजलेतत्रब्रह्माऽऽसःस्वपुरागतः॥ध्यानेचक्रेतदाविष्णो
स्तुतिकुर्वन्मुहुर्मुहुः॥समुत्पन्नस्तदाविष्णुर्नासंधाद्विधेरथा॥वराऽऽस्तुयमालोयत्र
मेणविधेमागतः॥ततस्तुनश्चतेनैवगतश्चैवजलेतदा॥नारदंचतदापश्यंध्यासंयु

तंरुरिं नारदोप्यतदाश्रुत्वाह्लादेयाममाधुना ॥ विष्णुरुवाच ॥ यावच्चयुध्यतेतेन
तावज्जलविशोषणं कर्त्तव्यंचत्वयाचात्रस्थेवंकर्ष्यतेमया ततश्चाजलितातेनजलंनीत्वा
मुखेतदा पीतंचमूषिणातावद्यावद्युद्धंसमाप्यच ततश्चविष्णुनातत्रपंचवर्षाणितेजले स्थि
तेपंचभ्रातंचैवहतंयुद्धमलक्षणा तंहत्वाचततश्चैवमुखेधृत्वाचयांतदा निःसमारवरा
रूपब्रह्मणेप्रददौचतां जयंगतोहरिस्तत्रहतंकार्यसुदुष्करं अतःपरंनृसिंहस्यकारणंक
थयामहंयश्रुत्वासर्वपापेभ्योमुच्यतेमानवःक्षणात ॥ इतिशिवपुराणेवायवीयसंहितायां
यः ॥ दृध ॥ सूतउवाच ॥ दितिदुःखंतदाप्राप्तःपुत्रस्यहननादिह दितिदुःखंवि
नाशायहिरण्यकशिपुस्तथावर्षाणमयुतेचैवब्रह्मलोवरकारणा हत्वाश्चैवसपुत्रान्वा प
दितिर्नीताकृतार्थतां शरीरेचत्तदातस्यविरामवरोनहि ततोब्रह्मारमश्चैवमुक्तासमवाच राम
च वरंदातुंसमायातोयन्नास्तिदितिजोसुरः प्रसन्नोस्मिवरंब्रूहिवाचार्यासुरराट्तथा त्वया १५५

चनिर्मिताथांवैसर्वलोकश्चनभोजयेत नशत्रौनदिवान्नौनवाविर्यान्तोतत्रे एतदस्तुवरं
दत्वाजगामनवनंस्वकं शोणितास्वेपुरेगत्वादैत्यानामुपसर्वतः स्थगीतिंतस्तत्रैवपातालं
चजितंतथा आज्ञांप्रवर्त्तयामासएषांसर्वतोदिशं नकृत्वामंत्रिणोक्रूरानास्वस्थंचशोभनां
स्त्रीलोकोत्सवशेहत्वाराज्यंचैवाप्यकंटकं चकारहरिविद्वेषीधर्मलोपपरायणः प्रह्लादोदिस
पुत्रंत्यक्त्वातत्कुलेहरिसेवकः शोदनेपितदातेनतत्रकेहरिसेवनं पंचवर्षेचसंजातेपठना
र्थंनियोजितः वाद्यमानेषुतूर्येषुपाठकस्यप्रदंगतः पाठकेनतदाविद्याद्यासुरीपरिपाठिता प्र
ह्लादेनतदाचैवनमोनारायणेतिच कारितःपाठकेनापिपाठचपुनःपुनः एदानींगत्व
तांवाचःपुननैवंकरिष्यतितदानदानुप्रह्लादोहरिमेवस्मरन्वि प्रदंगतंतुसंवेत्यहिरण्य
कशिपुस्तदा किमर्थितंगुरोर्गेहेत्योसंगेत्यपृष्टवान् इतिपृष्टस्तदोवाचनमोनारायणे
तिच हिरण्यकशिपुरुवाच रुष्टोस्मितदाश्रुत्वाकिमर्थंतेनराधमा गुरुगृहे

पतत्रैवरेऽहङ्गीकृतं कथं गुरूक्तंपुनस्तेचसर्वेनहाऽकरोत्तदा ततःपुत्रेमग्नेसैवकर्के
शुदैत्यसत्तमः कथयामासतांऽहेपुत्राधीनंमृणंयतः ततःपुत्रंगृहीत्वाचतदधीतदृष्ट्वात
तदापुनस्तेनतदाप्युक्तंश्रुत्वामाताब्रवीदिदं सर्वंचदृष्ट्वेवंत्वत्कृतंदुःखमवाप्यते पु
त्रास्त्यजनृहरेर्नामस्मासुरीसमुपाश्रय पुत्रास्तोमातरंसुचेश्रूयतांमद्वचोहितं मरुत्क्षय
यात्त्रिवैहारंगतोमहागजः यत्कृतेनयेनैवत्यजिष्यामिहरिंपुनः शिक्षाचैवाप्यकर्णेचम
न्त्रंकरेप्रदाः सार्धकालेंद्रियाणीहजनानृहरेरिह यदाजपंतदत्रवंतुनत्यजंहरिकी
र्तनं इत्येतद्वचनंश्रुत्वामाताऽऽत्मनुपागता स्वामिनेकथयामासह्यसाध्योबालको मया
राजाचमंत्रिणःसर्वान्समाहूयाब्रवीदिदं कुलांगारःसमुत्पन्नःपुत्ररूपेणमंत्रिणः तस्मा
दयंचरंतव्यःसर्वथाकुलदूषणः अग्रोदास्यश्चरात्रेश्चछेदनोयंयथापुनः विरोधस्त्रेव
कर्त्तव्योमज्जनीयोजलेथवा अन्यैकैश्चप्रकारैश्चमारणीयःप्रयत्नतः हत्वंसजतिमाणान्वा

इतिनेतिश्चयोमतः इत्याज्ञांचसमासाद्यप्रधानाबालकंतथा सिद्धेत्युक्तपयामासुर्यथा
ज्ञप्तंतथाहिते अथिश्चरीतत्रयातोजलेचस्थलतांगते स्थलेचजलतांयातेविषंचामृत
तांगते शस्त्राणिपुष्पतावेचहरेर्नामश्चकीर्तनात पृथिव्यादीनरास्त्वेवंयुपकारैःप्रबोध
यन्नशक्नुवानृतदाऽत्यंआनंदंपरमंगतः तदातेचप्रधानावैविस्मयंपरमंगताः एतैर्नपी
ड्यतेबालःकिंकार्यंगम्यतांपुनः राज्ञोनिवेदयिष्यामः कथंबालोनसंशितः तथाविधांश्च
तान्दृष्ट्वाप्रह्लादोवाक्यमब्रवीत् कथंवैविस्मयाविष्टाःयूयंचैवंगतिंश्रिय शक्नुयाश्चेवतद्व
स्तुयेनवैपीड्यतेनहि जलेचशयनेतस्यहरेश्चपरमात्मनः अग्नौश्चैवमुखेतस्यविषंचामृ
तत्वंगतं पृथिवीचगुणंतस्यविस्मारयतिकिंपुनः विज्ञानवत्तिपुराज्ञांचेकिंचित्कर्तुस
मीहते सर्वेचरंतुराधीनंस्वतंत्रोनैवकश्चन इत्येवंवचनंश्रुत्वाप्रधानाविकलाश्रमाः
तत्रागम्यचतसर्वंराज्ञेविनिवेदितं एतादृक्कदापीदृग्नृतेदृक्षंनप्रभो अस्माध्येया

तनात्तच्च पुत्रेकिंलेकरिष्यति तदा येतद्वचः श्रुत्वा राजाऽः स्वपुरागतः समाकृत्य तदापुत्रं
त्रोजयन्त्याद्यनादिभिः तथापिचरत्नैर्नानापुष्पैते नवैतदा येषांचमनसिप्राप्तोरुचिः परपुरं
जेयः तज्जनेसेवनेध्याने तृजनेस्मरणेजनोः अनंतसुखदंप्रोक्तं पुराणेपरिकीर्तितं नचज
तीयुताधर्मप्राणंतेयदिजायते किंपुनश्चैवपक्षादश्चसतीतिसुनिश्चितः राजापुत्रेत
दाश्रेष्ठंपुनश्चश्रुत्वेत्यदात् यथातथाचबालोयंस्वप्नेपरमेश्वरं तथाकार्यत्वयास्वा
मीनूप्राणसूतोसिमेप्रभो ऊरुस्तस्यवचः श्रुत्वागृहीत्वाबालकंपुनः पाठयामासतोविप्रातद्वि
धोबालकैः सहएतेबालाः कथंबालपठंतिपठतोत्वया त्वमेवपठतोविद्वोराजादास्यतितेसु
खं पुत्रस्यचपरोधर्मः पित्राज्ञापरिपालनं चितुर्पुरंपुनस्तेचवरोव्यासिनसत्कृयः रत्ने
वंवचनेश्रुत्वानत्वोनारायणेतिच पाठयामासतान्सर्वान्पाठयान्तासवैतदा परेक्षेचगु
रोस्तस्यदानांचैवाप्यदर्शयन् नत्राता नचितावेधुर्नत्रानसहोदरः नमित्रेनकलत्रेचओ

सेसुखफलप्रदं स्वप्नतुल्यफलंहेतत्रजन्तोरुरिस्वयं प्रह्लादस्यवचः श्रुत्वातेपिना
रायणेतिच ऊचुःपरस्परंसर्वेह्यानंदपरमंगताः तच्छ्रुत्वाचगुरोर्ईः खंप्राप्तवानतमनसं
यन् ताउयामासकुरोवैजीवनेदूरतः कथं तेपितुराज्ञादेवचलिताःसर्वबालकाः प्रह्ला
दोनैवचलितो धैर्यपरममाश्रिताः गुरुश्चैवपुनः प्राहगृह्यतेनपितात्वया ताउयिष्यामस्ते
षंतेसज्यताचरुरिस्वया रत्नेवंवचनेश्रुत्वाप्रह्लादोवाक्यमब्रवीत् त्वयोक्तंचैवतत्सत्यंपि
तानोलंघ्यतेमया तावदेवपिताचार्यंयावन्नप्राप्यतेपिता जंतोर्जन्मिचसंयोगात्सर्वदुःखकरं.
पुरः दीपस्त्रीस्वयातावन्मोदतेभूविसन्नराः यावत्सूर्यंचदृश्येतपुनर्दीपः कथंपिता सुखं
करश्चलोकानांजायतेनकदाचन एवंविधंपदंपित्रापुत्रसमागमे अगस्त्यऋषिवर्यं
चसमुद्रजलशोषणं येनैवसुचरित्रेणप्राप्यतेशाश्वतंपदं तदेवचप्रकर्तव्यंनायथाकर्हि
चित्पुमान् एवंचताड्यतेविप्रताड्यतांनानिषिध्यते मत्पिताचोनवेत्तित्वंसवैरंतोकरिष्यति।

प्राणाश्च यदि मे विप्र गमिष्यति तथा पुनः ॥ गच्छतां च सुखेनैव न त्याज्यं हरिकीर्त्तनं ॥ इत्येवं वचनं ।
श्रुत्वा गुरुः पीडां तदाकरोत् ॥ रोमोपि वक्रितं नैव प्रतापाच्च हरेरिह ॥ सामान्यस्य मनुष्यस्य मान
श्चेतसि जायते ॥ किं पुनर्न हरेरेव जायते ऋषिसत्तमाः ॥ प्रयत्नं निःफलं ज्ञात्वा गृहीत्वा बालकं गु
रुः ॥ अयाजगाम तदा दैत्यगृह्यतां पुत्रकस्त्वया ॥ अस्माकं बालका ये च ते सर्वे सदृशाः कृताः प्रयो
जनं पुत्रेण यथेच्छसि तथा कुरु ॥ इत्युक्त्वा च गतः सोथ राजा दुःखमुपागतः ॥ तदनंतरं च यज्जातं
श्रूयतां ऋषिसत्तमाः ॥ ॥ इति शिवपुराणे नृसिंहचरिते वाक्यनिरूपणाध्यायः ॥ ६५ ॥ सू
त उवाच ॥ ॥ समाहूय तदा सोपि मंत्रिपुत्रानथाब्रवीत् ॥ धन्यास्थः कृतकृत्यास्थस्तत्सर्वं
पितृशासनं ॥ मत्पुत्रं च तथा यूयं शिक्षयंतु मदाज्ञया ॥ तथेति वचनं गृह्य नीत्वा तं रहसि स्वयं
ऊचुस्ते श्रूयतां मित्र क्रियतां वचनं पुनः ॥ ईदृशं पितरं त्वं च दूषयित्वा कुतः सुखं ॥ तस्मात्त्वं च
मदीयं वै वचनं कुरु सर्वथा ॥ अस्माकं च मतं ह्येतद्यथेच्छसि तथा कुरु ॥ बहुधा शिक्षितः

प्राणाश्च यदि मे विप्र गमिष्यति तथा पुनः ॥ गच्छतां च सुखेनैव न त्याज्यं हरिकीर्त्तनं ॥ इत्येवं व
चनं श्रुत्वा गुरुः पीडां तदाकरोत् ॥ रोमोपि वक्रितं नैव प्रतापाच्च हरेरिह ॥ सामान्यस्य मनुष्यस्य मा
नश्चेतसि जायते ॥ किं पुनर्न हरेरेव सोपि न मेने वचनं पितुः ॥ प्रत्युवाच तदा सोपि श्रूयतां मि
त्रसत्तमाः ॥ कः पिता कश्च बंधुर्वै का माता भगिनी पुनः ॥ किं मित्रं किं कलत्रं च सर्वं स्वार्थपरं त्वि
ह ॥ यथा सायं च वृक्षेषु पक्षिणो विविधास्थिताः ॥ प्रातःकाले च ते तत्र स्वकार्यं भवति प्रभो ॥ त
त्रैव च गमिष्यंति उद्रुयंति ततस्ततः ॥ तत्तद्गृहेषु पक्षादिर्बध्यंते संगयोगतः ॥ कर्मभोगं स्वकं भु
क्त्वा गच्छंति दैवयंत्रिताः ॥ इदं सुखं च संसारे दृश्यते ग्रहसंभवं ॥ सर्वं स्वप्नसमं चेत्थं नात्र कार्या
विचारणा ॥ देवा मनोरथो यदृक् क्रियते पुरुषेण च ॥ तथा रात्रौ प्रदृश्येत तथेदं सुखमुत्तमं
एवं मत्वा तथा यूयं भजंतु वै हरिं मुदा ॥ अन्यथा च ममापाशो भविष्यति न संशयः ॥ कतिधा
च पिता पुत्रं पितृत्वे परिकल्प्यते ॥ पुत्रश्च कतिधा तं वै पुत्रत्वे परिकल्प्यते ॥ जीवाश्च कर्मब

द्या वैश्वानरे योनिसंकटे केवलंपातके चेत्स्यात्तदानिरयनाशवेत केवलेनैव पुण्येनस्व
र्गलोकंजनेत्तवै उभयोःसमतायावैमानुषत्वेजनेदिह उभयोश्चक्षयेपुण्यैर्जन्मवतीतिमुनि
श्रितं यावच्चकर्मसंबंधास्तावन्मुक्तिमुदुर्लभा तस्मान्नत्वंकर्मनाशार्थंभजनीयोहरिःसदा॥
दरेश्वजज्ञानेनैवकर्मदूरीभवत्युत नोगेनैवाथवाबंधःक्षयाश्चैवंपुनस्तथा देहिपवित्र
तांयातिचान्यथात्रमणंजवेत यावच्चमलिनंवस्त्रंतावद्रंगोनसज्जते क्षालितेचपुनर्वस्त्रे
रंगःसज्जतिवैदृढं तथेदंचशरीरंवैपापैर्मलिनतांगतं निर्मलेभजतेनैवजायतेनात्रसंशयः
यूयंचबालिनाःसर्वेतदाज्ञापालकादृढं भवंतश्चप्रकुर्वंतुतदाज्ञांसर्वथापुनः मयातूनैवक
र्तव्यंवचनंराजसंनवे यदहंराजवचनंकरोमिप्रपतेदिवं इत्युक्तास्तेतदाबालाबोधिता
स्तेनसूनुना समागतंतदातेचराजानमिदमब्रवीत राजाविधेचनंतेषांश्रुत्वातेचसमाकु
यत्नं समागतेप्रसन्नास्तंबोधयामासचासुरः शृणुपुत्रत्ववत्सामिमूढानांवत्सजाधुना॥

तदर्थेचहरिलोकान्नजंतेवैनिरंतरं तस्मर्वेचत्वयाशानंभजनीयंनहेतुना दिव्याश्च
दानवाःसर्वेगंधर्वानागसत्तमाः ऋषयश्चपरायेचवरुणाःसेंद्रमारुताः नान्यःपरोहरिः
क्वत्रनजासिलवेदाधुना इत्येवंवचनंश्रुत्वाप्रह्लादोवाक्यमब्रवीत शृणुदैत्यकथंब्रूषे
विद्मुर्मयादयाधरः सेवनीयोविशेषेणात्रकार्यविचारणा अंतरंबहुधाप्रोक्तंवेदेच
रुद्रेस्मृतौ शंखेचैवमणौचैवकोविदेमंडुकेतथा कर्दमेचंदनेनैवसात्विकेतामसेतथा॥
सूर्येचैवाथरत्नौतेयेदेवाप्रकृतेतथा नोरेचैवसुवर्णेचगजेचश्वकरेतथा
युवयोरंतरंतावन्नात्रकार्यविचारणा अहंसतपरस्तेचमत्सूत्रविदूक्तिर कामीमा
नीचदुःखनाशावाप्तिरुःखदत्वयितुहेतंनास्तितस्मिंशुहेतंपरं तस्मान्नत्वंभ
सेत्वंहिरंदेवंजनार्दनं इत्येवंनिश्चयंत्वंचज्ञानहीनंदैत्यसत्तमः गजस्मारेणंहित्वाशृणु
जंबुःसमारुहेत्तमेवसदाभूयोनितरांहरिरीश्वरः कर्तुमिच्छसियत्नंचतत्करुष्वनि

रंनरं ॥ इत्येवंनर्मितःसोवैपुनश्चैवाब्रवीदिदं यंपुत्रनजसेनित्यं सवैपुत्रवदस्वतत्त ॥ इत्ये
वंवचनेश्रुत्वाप्रह्लादोवचनंतदा ॥ आददेश्रूयतांश्रेष्ठाःश्रुत्वोपायंनवेदिद ॥ ॥ इतिश्रीव
पुराणेनरसिंहचरित्रेवचविवेकाध्यायः ॥ ॥ ६६ ॥ ॥ सूतउवाच ॥ ॥ श्रूयतांमुनयःश्रे
ष्ठास्तेनोक्तंयदृचोब्रुवे ॥ ॥ प्रह्लादोवाच ॥ ॥ यस्मृंचत्वयादैत्यश्रूयतांकथयामितं ॥
पृथिव्यांचैवयत्किंचित्स्थूलंसूक्ष्मंचवर्त्तते ॥ समुद्रेपर्वतेवापिवृक्षेदेवसरित्सुच ॥ चेतनाचे
तनेचैवग्रहेचनगरेतथा ॥ सूर्येचैवाग्नरूपेचदैत्येचपितृकानने ॥ त्वय्यस्तिचसदायोवै
मध्येवचनसंग्रहः ॥ इक्षासूर्वंचमध्येचह्यंतेचैवजविष्यति ॥ तरूपंवर्त्तितुंनैवशक्यतेदै
त्यसत्तम ॥ इत्येवंवचनेश्रुत्वादैत्यश्चैवाब्रवीदिदं ॥ श्रृणुपुत्रश्रवस्यामियदुक्तंहित्वया
पुनः ॥ तस्यंनैवविद्येतयत्रनैवहरिःस्वयं ॥ इतिश्रुत्वावचस्तस्यउवाचदैत्यसत्तमः ॥ य
दिहरिश्चसर्वत्रस्थंजेस्तिवर्त्ततेवद ॥ इत्युक्तुवदतेचवर्त्ततेहिसुनिश्चिते ॥ तच्छ्रुत्वाव

चनंतस्यकरवालेप्रगृह्यच ॥ दंतानसेपीड्यदंतायैर्नेत्रेचारक्तेक्षणे ॥ उच्चचालसनात्
स्मातरवक्रःक्षोणतलंनयत् ॥ पर्वतानांयदापत्तेतथैवनायतेद्विजाः ॥ तस्माच्छंजास्त्यदै
वोविद्युताविरजूनदा ॥ संध्यायांरक्तमानस्त्रासयन्दैत्यसत्तमान् ॥ अट्टंचैवनारीरंचन
रस्याईहरेरपि ॥ तस्मिंश्चतदारूपंधत्वाचनिःसमारह ॥ मल्लत्वेयथामेघोगर्जतेरूक्षिसत
माः ॥ तथाहरुरुंराक्षंकरुतस्तेःपुनःपुनः ॥ केसराःशोभमानाश्चतानिर्घातंप्रयत्नता
दैनचदिशाःसर्वाःप्रतिशब्दंचचक्रिरे ॥ मुखंस्फुरंत्वालयासर्वान्त्र्यालयन्दैत्यपुंगवान् ॥ क्रो
धेनतस्यनागवानपातयन्भूएवतांपुनः ॥ मर्दयित्वनखैश्चैवकरालेनहरेर्वपुः ॥ तंदृष्ट्वालय
मापन्नाःदैत्याःसर्वेपुरःस्थिताः ॥ युद्धायचक्रतोद्योगापुरंचक्रुःसुदारुणं ॥ विद्युताचतदाते
चरुताःश्यासेनतत्क्षणं ॥ हरण्यकशिपुश्चैवयुद्धंचक्रेसुदारुणं ॥ पृथिवीसंश्रयेनाशाः
समुद्राश्चैवचालिताः ॥ द्यौश्चचालसनक्षत्राःपर्वताश्चलितंगताः ॥ एवंयुद्धंनयोरासीन्मुरू

र्त्तं ऋषिसत्तमाः ॥ पश्चात्सोपि स्वयं ज्ञात्वा लोकानां दुःखमद्भुतं ॥ सायं च कर्षयामास देहल्यां दै
त्यपुंगवं ॥ उत्संगे च तदा धृत्वा नखैश्च हृदयं स्वकं ॥ विदार्य रुधिरं तस्य पपौ च गर्जयन् तदा
अंत्राण्यपि च तस्यैव गले चैव व्यधारयत् ॥ मारितश्च तदा तेन पश्यतां च दिवौकसां ॥ जय ज
येति भाषंतो मुमुचुः पुष्पवर्षकं ॥ देवाश्च परमः प्रीताः गीतं नृत्यं च चक्रिरे ॥ कियंतो मारिता
दैत्याः कियंतश्च पलायिताः ॥ निर्दैत्याः पृथिवी जाता दूषं च दूरतो गतं ॥ लक्ष्मीश्चापि तदा तं च
दृष्ट्वा विस्मयमागता ॥ जगत्स्वास्थ्यं तदा लेभे ह्यानंदं परमं गतं ॥ अहो हि कीदृशं रूपं प्रभुणा
हि प्रदर्शितं ॥ देवदुंदुभयो नेदुः सर्वे निश्चलतां गताः ॥ कयाधुश्चापि पुत्रं शां शांतयंति विदूषि
ता ॥ प्रह्लादो विस्मयं प्राप्त अहो धन्यः स्वयं हरिः ॥ यद्यपि च हतः सोपि ज्वालानविनिवर्जिता ॥
त्वया च व्याकुलं जातं सर्वं चैव जगत्तदा ॥ देवाश्च दुःखमापन्नाः किं भविष्यंति हा पुनः ॥ इत्येवं
च वदंतस्ते भयादूरमुपस्थिताः ॥ परस्परं वदंतस्ते गंतव्यं च त्वया पुरः ॥ इंद्रं चैव वदंतस्ते गंत

व्यं हि त्वया पुरः ॥ मया चैव कथं प्राप्यं ह्यानंदं त्रिजगत्परं ॥ ब्रह्मा वदति मत्स्मश्रु न ह्यते किं क
रोम्यहं ॥ लक्ष्मीर्वदति नो रूपं दृष्टं रूपं कथं स्तुवे ॥ ऋषयश्च गता नैव देवाश्च न गतास्तदा ॥ क्रोध
शांतिः कथं तस्य जायते ऋषिसत्तमाः ॥ सर्वैर्मिलित्वा प्रह्लादः प्रार्थितो गतवान्पुरः ॥ तं दृष्ट्वा नृह
रिस्तस्य गात्रं च जिह्वया लिहन् ॥ दुःखितं दुःखितं वत्सं व्रणेषु चुंबयन् तदा ॥ उरसा लिंगयामा
स शीतलं हृदयं तदा ॥ ॥ नृसिंहोवाच ॥ ॥ दुष्टेन ज्वलितं मेद्य दैत्येन हृदयं मम ॥ जातं ते पु
त्रसंयोगात्पुत्रस्यांगं सुशीतलं ॥ पितुश्चैवाथ पुत्रस्य पुत्रपौत्रविवर्द्धनं ॥ भविष्यति च ते वं
शो ह्यवध्यो मे सदा किल ॥ इति वरं तदा त्वादेफल्कारान्मोचयन्तदा ॥ एतस्मिन्नंतरे देवा ग
णयं प्रार्थयन्पुनः ॥ त्वं च बुद्धिमतां श्रेष्ठ आखुश्च वाहनं तथा ॥ चैलंबं चैवोदरं तस्य रूपं हास्य
वरं तदा ॥ दृष्ट्वा देवास्तदा ते च वर्णयंतोति विस्मिताः ॥ वाहनोत्फालने सोपि वाहनात्पतित
स्तदा ॥ हास्यं प्रापुस्तदा देवा नृहरिश्च विशेषतः ॥ हसितं च तदा दृष्ट्वा देवाः सुखमुपागताः ॥

गतश्चैवहरेः क्रोधोऽस्तितेनतदापरं । तथापिनविवर्तेतज्वालाचहरेः पुनः ॥ दुःखंप्राप्ता
प्राप्तदादेवाः मुनीश्वरमुपायुः । गत्वाचस्तवयामासुर्लोकानां सुखहेतवे ॥ नमस्तेस्तुन
मस्तेस्तुनमस्तेस्तुसदाशिव । सर्वदुःखक्षयदात्रेतदाचरक्षितावयं ॥ समुद्रेमथितश्चैवर
त्नानांचविभागतः ॥ ततोदेवैस्तदाप्राप्तोगरहीत्वागरलंत्वया । रक्षितास्मतदानाथ नीलकंठेति
विश्रुतः । दृष्ट्वांचयदायस्यदुःखंसंजायतेमनो । तदानुस्मरचत्वाहिसर्वदुःखविलीयते
इदानींनूतनैर्ज्वालापीडितेनासदाशिव । रामचिंतसमर्थोस्मिनात्रनः संशयःप्रभो ॥ इतिस्तु
तःप्राहशंभोर्गच्छंतुदेवसत्तमाः । रामस्यांतिकमाशुवोदुःखंसर्वंयास्यितेमम ॥ मांगतः शरणार्थी
यस्मदुःखंचत्त्यंगतं । इत्युक्तास्तेतदादेवाआनंदंपरमंगताः । यथागतंतथाजग्मुश्चयतो
ऋषिसत्तमाः । शिवोपिसेविचार्यैवंरामरूपमकुर्वत ॥ धृत्वाजगामयत्रैवस्थितोसौनरहरिः
स्वयं । दूरतश्चतदायैवदृष्ट्वारूपंनयंकरं । उवाचवचनंतेद्यरक्षितादेवसत्तमाः । जयजयै

तिशंभुर्वैनमस्तत्वत्त्वयंययौ । विद्यादीनिविचित्राणिनत्यानिविविधानिच । पुष्पवर्षमनेकं
चजातंतत्रमहात्मनि । इत्युक्त्वाचतदादेवाआनंदंपरमंगताः । विष्णुशिवंचप्रशंसंतंहरे
रूपमकुर्वत । वर्णयित्वास्वमास्वंचगतास्वधामस्वंस्वकं । शिवोपिचतदादेवानआनंत्यत्व
हरिप्रतिरूपेसकलानकामानरक्षतांतरधीयत । तौदैत्यौचपुनःश्रेष्ठौजातौचरणस्तौ
नमौरावणःकुंभकर्णश्चराक्षसेश्वरौनिरूपितौपुनः । तावेवदशघोषस्यकुलेमहितौपुनः । वैकुं
ठंचपुनःप्राप्तौरामनाथरमात्मनः । इतिवश्यसमाख्यातंचरितंहरेः पुनः । शिवस्यचम
हित्वंयत्कथितंऋषिसत्तमाः । येचएतन्मरुच्चित्रंविष्णुश्चैवशिवस्यच । प्रशंसंतिमुदाऋषि
श्रेष्ठाऋषिसत्तमाः । तेनदुःखंसपापंचैवविद्यतिनसंशयः । अनेकंचफलंतेषांपुत्र
पौत्रादिसंपदः । नविद्यतिनसंदेहोतस्माद्दुःखंक्षितेमया । अतःपरंवदाम्यद्यश्रयतांकृ
षिसत्तमाः ॥ इतिशिवपुराणेरामचरित्रंसंपूर्णं ॥ ६७ ॥ नूषयऊचुः सू

तस्तूतमहाबाहो ज्ञानवानसि सुव्रत ॥ पुनरेव शिवस्यैव चरित्रं वद विस्तरात् ॥ पुरातना
श्च राजानऋषयो देवतास्तथा ॥ आराधनं च कस्यैव चक्रुस्ते परमर्षयः ॥ सूत उवाच ॥ ॥ सा
धु पृष्टं ऋषिश्रेष्ठाः श्रूयतां कथयामि वः ॥ ब्रह्मा पितामहश्चैव तत्पुत्राः परमर्षयः ॥ अन्ये च ऋ
षयो ये च कश्यपादय एव च ॥ ते सर्वे च शिवस्यैव पूजां चक्रुः पुरातनाः ॥ पार्थिवीं भौतिकां वापि
मानसीं वापि सत्तमाः ॥ कृत्वा सिद्धिं च संप्राप्ता इदानीमपि पूज्यते ॥ नारदोपि विशेषेण वसि
ष्ठो विप्रसत्तमः ॥ अरुंधती तथा साध्वी कश्यपो मुनिपुंगवः ॥ अदितिश्चापि नित्यं वै चकार पा
र्थिवीं पुरा ॥ मनवश्च सदा चक्रुः स्वायंभुवः पुरातनाः ॥ प्रियव्रतश्च तत्पुत्रश्च कारपूजनं शु
भं ॥ इक्ष्वाकुश्चैव मांधाता सगरो नद्युषस्तथा ॥ दीलीपश्चैव तत्पुत्र राजा दशरथस्तथा ॥ य
दायुः सकलं तस्य किंचिन्न्यूनं न पुत्रतः ॥ तदा दुःखं समापन्नः पुत्रार्थे पार्थिवान् तदा ॥ पुत्रेष्टिं य
च्चकारासौ तदा मध्ये स्वयं हरिः ॥ चातुर्भिश्चैव रूपैश्च संभूतश्च स्वयं तदा ॥ कौशल्या पार्थि

वान् चक्रे ऋष्यादिष्टा स्वयं सती ॥ रामश्चैव तथा नित्यं पार्थिवं समपूजयत् ॥ तद्वंशे ये समुत्प
न्नास्ते सर्वे समपूजयत् ॥ पुरूरवा च राजा वै ह्यैलः सर्वशुभंकरः ॥ पार्वतीशापसंयोगात् स्त्रीत्वं
तस्य न्यवर्त्तत ॥ मासं स्त्री मासमात्रेण पुरुषत्वं पुरा भवत् ॥ पूजने पार्थिवानां च जातं तस्य महात्मनः
भवंतश्च महापूजां शिवस्यैव तदाकरोत् ॥ अन्येपि ये महाभागा पांडवाः प्रत्यपूजयत् ॥ अर्जुन
स्य विशेषेण व्यासस्य वचनात्तथा ॥ कृष्णेन च तथा नित्यं वर्द्धके पर्वतोत्तमे ॥ पूजनं च शिवस्यै
व सप्तमासावधिकृतं ॥ प्रसन्नो भगवांस्तस्यै वरान् ददावनेकशः ॥ संप्राप्य च जगत्सर्वं वशे
चक्रे महामतिः ॥ बिलेशस्य प्रयत्नेन कृता पूजा महात्मना ॥ नलेन च कृता पूजा शंकरस्य महा
त्मनः ॥ पूर्वजन्मनि वै विप्रास्तेन राज्यं सुशोभनं ॥ प्राप्तं च रक्षितस्तेन यतिर्हरसमीपतः ॥ तस्य
पुण्यप्रभावेन राज्यं दत्तं हरेण च ॥ इति तस्य वचः श्रुत्वा पुनरूचुर्ऋषीश्वराः ॥ नलेन च कथं पूर्वं
पूजितः शंकरो मुदा ॥ रक्षितश्च यतिः को वै तत्त्वं ब्रूहि सुविस्तरं ॥ अन्यच्चैवार्जुनस्यैव सेवनं शं

कर स्यच ॥ ऋष्टिरुवाच ॥ विरोधेनाव्यासस्यैवोपदेशनं कथं जातेत्यत्रोच्यते ऋष्टिरुवाच
रतिरस्ययतिः कोवैतत्ते ऋष्टिमुत्तमं इतितेषांवचः श्रुत्वासूतोवचनमब्रवीत ॥ शृणुविप्रा
नवदाग्निनलस्याग्नितेजसः ॥ अर्बुदाचलसंज्ञेपर्वतेसिद्धसेवनः ॥ आऽकस्यतदा
ध्यासेवसतिस्मपुनीश्वराः तत्सलीमाऽकीनाम्नीचकारतपोवरं ॥ तिरंतरंजलेतैवतपो
ऽजोचचक्रतुः ॥ आनेदेनसमायुक्तौनुजानौजोगमुत्तमं ॥ कस्मिंश्चित्समयेस्वामी आदा
गतोयदा एकस्मिन्समयेकस्मितयतिर्नृपतिमागतः संध्यायांदर्शनेहत्वाशंकरस्यछले
छयाद्यमारात्रिसमाऽत्यात्मर्छास्यदंपुरा ॥ जोजावेचेतिसंध्यायविचार्यसमुपागतः ए
काकिनीतदादृष्ट्वाजयत्रस्तविजोचनः ॥ तथापिचपुनस्तंचतिष्ठदेवनतोनमः इतिप्रोक्तस्त
यायोगीतस्थौतदासन्नेपुरः एतस्मिन्समयेजातेस्वामुग्रामयरूधिपः ऽजनेतस्यहत्वाच
ऋष्टिकार्यंप्रजोऽइति ॥ यतिरुवाच ॥ ॥अथस्थलेचमहेवैदीयतोत्तरेवच ॥ गतिर्व्येस

र्यथाचित्रंरतिउक्तोपुवाचरतयेचैवस्तंमेद्यवर्त्ततेनात्मयाकर्यं इतुक्तस्तत
यासोपिगमनार्थेकर्यंदधेतावऽिष्टावचः प्रोक्तंकर्यंवैवनविष्यति स्यातिनेचतदाऽतयू
योऽस्थिरतोयरेऽहंबहिःस्थिताःकुर्यांह्यापुथानिदधात्यपि तद्वचस्वऽतेतेनस्यातिनाच
विचारितं स्त्रियंबहिस्थनिक्षास्यकर्यंस्तेयंमयाग्रहे यज्ञावितऽवेदेवमयास्तेयंबहिर्तिरि ह
तोयरेतदाऽत्यारेतोचमुरक्षितौ स्वयंचैवामुधात्यत्रधत्वातिष्ठऽनेचरः योगीध्यानप
रोन्नत्वास्थितःकोणांतरेतथा सोपिनिश्चंकरोतिस्मस्थितोबहिर्वनेचरः रात्रौचपरावस्तेवैपी
ऽयामासुरऽतं तेनैवचयथाशक्तिरतोयत्नश्चनिश्चलः सोपिनिश्चंकरोतिस्मस्थितोग्राह्रे
स्वनस्थितः प्रातःकालेयोगीदेहंत्यक्त्वास्थितंचनस्थितं ऽःखेप्राप्तदासाचकिमर्थंविघसे
प्रश्नोधर्म्योयंरतस्तोयंयज्ञानामीदृशंस्थितं अत्रचानुगतिंप्राप्तिस्त्रीणांधर्मसनातनः॥
एवंचसहितंमत्वातथाऽत्वात्वंयतिः विचार्यैवंस्वयंनारीसंविवेशऽतासनं एतस्मिन्नंतरे

साक्षाच्छिवः साऽरजसूसुरः ॥ धन्योधन्यासिसाधीचत्वसन्तोस्तितवानघे एतस्मिन्नवतारेच सु
खंप्राप्तेनकिंचन तस्माच्चजन्मतोयातएकवारंपुनर्नहि ॥ अथयोगीमतोबुद्धिरसरूपोभविष्य
ति ॥ अथेनमतियुवयोःसंयोगंचकरिष्यति निश्चयश्चवारसेनश्चनैगरेनैषधेवरे तस्य
त्रोचनजोनामभविष्यतिनसंशयः ॥ त्वंचैवनीतरातोवैवैदर्भेनगरेशुभे दमयंतीचवि
ख्याताभविष्यतिगुणान्विता युवांवोनौतिसिक्षाचराज्यंभोगंसुविस्तरं भुक्त्वामुक्तिंप्रयो
गेणदैर्घ्यंजीवोभविष्यति ॥ इत्युक्त्वाचस्वयंशंभुश्चचरेशोभनंवनं दमयंत्यास्तथाधर्म
दक्षत्वेनेतिसंस्तवः ॥ तउक्तंचतदाह्यासीत्तेषांचैवमहात्मनां ॥ इतिश्रीस्वसमाख्यातंश्रूयतां
चार्जुनस्यच ॥ ॥ इतिशिवपुराणेदमयंतीनलजन्मांतरप्राप्तधर्मध्यायः ॥ ६ ॥ सू०
सूयोधनजितास्तेचपांडवाःपंचएवते द्रौपद्याचतयासार्द्धमाश्रमंवनमाययुः ॥ तत्र
चसूर्यदत्तोवैस्त्रीचास्त्रित्यतेनदा कालेचवाह्यमानास्तुःखेनऋषिसत्तमाः ॥ दुर्वासा

प्रेरितस्तेनछात्यर्थंचसमागतः ॥ शत्रैश्चैवायुधैःसार्द्धंयाचयामासतान्तदा ॥ मनेक्षितं
चभोज्यैश्चयतोऽऋषिसत्तमाः ॥ प्रेषितश्चैवराज्ञातंर्यतस्तिष्ठसमन्वयेहिते ॥ ऽःखिताश्चत
दाप्राणान्तत्यक्तंतिमुपादधुः ॥ द्रौपद्याचस्मृतःहरोह्याजगामतदाणादपि ॥ मकंचनदत्वित्वा
तुतेषांतत्रिःसमादधत ॥ दुर्वासाचतदाशिष्यान्तान्नत्वात्वापलायने ॥ चकारत्वरितःहरो
माययाज्ञानमुहूर्तंयस्तैश्चनगवान्ततःहरस्यसूनंचकिंनवेत ॥ धन्याश्चैवसतांधर्म्याश्चये
षांचनगवत्पा ॥ पश्चात्तेपांडवाःहरंपप्रछुःकिंनविष्यति ॥ वत्सवान्नरुत्यन्तःकिंकरि
ष्यामनोप्रभो ॥ ऽसुरुक्तस्तुतदाऽत्मःपांडवान्विदमब्रवीत् ॥ श्रीहरोवाच ॥ मयासारा
धितःशंभुःप्रसन्नःपरमेश्वरः ॥ बर्हुकेपर्वतश्रेष्ठेसन्नासमुसेवितः ऽहानंकालान्तदादत्वा
बिल्वेश्वरस्यसंस्थितः ॥ तत्रतापःमयासर्वंसानर्थंलब्धुनं ऽदानीसेव्यतेदेवैर्मुक्तिमु
क्तिफलप्रदः ॥ यूयंचैवमुसेवध्वंमुक्तिमुक्तिफलप्रदं ऽसुरुक्तंतदधेहंमाश्वास्यपांडवा

नयधर्मोऽवाप्तिर्विहन्तेचप्रेषयामासुरोजसा॥ गुणानांचपरित्राणार्थंतस्यऽर्योधनस्यच॥ सचसर्वंचनन्नत्वंऽयोधनगुणोदये॥ समीचीनंचतेनैवज्ञात्वापुनःप्रापप्रनूस्रति॥ तऽक्रुतेनिशाम्यैवदुःखेप्राप्तुर्मुनीश्वराः॥ किंकर्त्तव्यंक्रुगंतव्यंसत्यायेनयंत्रिताः॥ एतस्मिन्समयेव्यासोजटाजूटविभूषितः॥ तेजसाचस्वयंराशिःसाक्षाद्धर्मऽवापरः॥ तंदृष्ट्वातेतदाप्रीताऽऽसनायपुरतःस्थितं॥ दत्वासनंतदातस्मैकृतांजलिनमुद्यतैः॥ तत्रोपविष्टंतंव्यासंपूजयंतिस्महर्षिताः॥ पूजांकृत्वाविधानेनस्तुतिंचक्रुर्विधानतः॥ कृत्वापुतिंचसंतोष्यधर्मास्मृतिमाब्रुवन्॥ अद्यनःसफलंजन्मअद्यनःसफलाक्रियाः॥ अद्यतेसफलादेवब्राह्मणाःसत्यवादिनः॥ जपश्चैवतपश्चैव दानंचविविधंतथा॥ एतत्सर्वंचसफलंजातंतेदर्शनान्नृणां दुःखंचदूरतोयातंदर्शनात्तेषितात्मनः॥ दृष्टेश्चैवनरदुःखंदत्तेनःकूरकर्मणः॥ श्रीमतोदर्शनेज्ञानंदुःखंसर्वंगतिष्यति॥ कदाचि
न्नगतंतत्स्यान्निश्चयंनैवचास्तिते॥ सदाश्रयेचसंप्राप्तेसमर्थःसर्वकारिणी॥ यदिदुःखंनगच्छे

ततदैवचात्रकारणं॥ निश्चयंनैवगच्छेतदृद्धिश्चात्रकारणं॥ सदोचस्यजनोयंकल्यवृक्षस
मोमतः॥ तऽगुणानैवशक्येतवर्णितुंवस्तुमात्रतः॥ आश्रयस्यवनादेवज्ञायतेबलवोगुणः॥
जघन्येचगुरुत्वंचसर्वंचाश्रयतोभवेत्॥ उत्तमानांस्वभावोयंयद्दानंप्रतिपालनं॥ रंकस्यर
क्षणंलोकेह्यतिश्रेयस्करंमतं॥ अतःपरंचजाग्रेचगुणदोषौनतावुभौ॥ एतस्मात्कारणात्स्वा
मिन्त्वयिदृष्टंशुभंसदा॥ त्वदागमनमात्रेणसंतुष्टंनःसहितः॥ इत्येतद्वचनंश्रुत्वाव्यासश्चै
वाब्रवीदिदं॥ इतिशिवपुराणेशिवमहात्मनिरूपणेध्यायः॥ ६६॥ व्यासोवाच॥
धन्यास्तःकृतकृत्यास्तःसत्यनैवविनेष्टितं॥ सुजनानांस्वभावोयंप्राणांतेसत्यरक्षणं॥ धर्मश्चस
त्यतेनैवसत्यंचफलजातकं॥ अस्माकमपियूयंचतेचवैतुल्यभागताः॥ तथापिपक्षपातोयं
धर्मिष्ठानांमतोबुधैः॥ प्रथमंचैवऽद्रष्टेनधर्तराष्ट्रेणचदुष्टा॥ धर्मस्यकःस्वयंजोतायु
ष्माकंरक्षमाश्रितं॥ तस्मायूयंचतेचापिपुत्रास्तुल्यानसंशयः॥ पितर्युपरिबालास्यनुकंपा

मरुत्तना॥पश्चात्सुत्रश्चतेनैव मारितोनकदाचन॥अनर्घोतैवजायेतयद्येवंनकृतंनवे
त॥अयंऽहोनवेतश्चधर्मिणःसत्यवादिनः॥तस्मादेतेसुतस्यैवसुतोसंजायतेऽरघ॥यच्चैव
वाचितंबालेनत्रारोहेनवेदिह॥यस्माऽःस्वेनकर्त्तव्येनवर्जिःसर्वथासुना॥स्मृकाःपा
ऽवस्तंचपुनरेवाब्रुवन्वचः॥सत्यमुक्तंत्वयानाथऽहैर्ऽःखनिरंतरं॥दीपतेचवनेत्रैवमुऊ
र्मुऊर्ऽरात्मजिः॥तन्नाराधयसुतंकिंचित्तमध्येदेयंत्वयात्रजो॥कृतेनकथितंपूर्वंआराध्यः
शंकरःसदा॥प्रमादश्चकृतोस्माभिरिदानीमुपदिश्यतां॥इत्येतद्वचनंश्रुत्वाव्यासोहर्षसमन्वि
तः॥उवाचश्रूयतांश्रेष्ठमयाचसेव्यतेशिवः॥नवर्जिःसेव्यतोनित्यंसुखंस्यादचलंसदा॥पांच
सुपांऽवेषेवविचार्यशंकरार्चने॥अर्जुनंयोजयामासपुरातनमुनिस्मृतिं॥॥व्यासोवाच॥
तपस्तानेविचार्यैवपुनरेवाब्रवीदिदं॥श्रूयतांपांऽवश्रेष्ठःकथयामिहितंसदा॥श्रेष्ठादीत्
एापर्यंतंयत्किंचिद्दीयतेजगत्॥तत्सर्वंशिवरूपंचद्रूपंध्येयंचतत्सुनः॥सर्वेषांचैवसेव्यो

वैशंकरःसर्वऽःखहा॥विमुश्चवर्त्ततेयोवैतस्यैवरूपमऽतं॥परंतुदीर्घकालेनप्रसन्नोज
वतीस्मरं॥शिवश्चैवचस्वल्पेनकालेनैवप्रसीदति॥मुक्तिंददातिमुक्तिंचगछतीतिसुनिश्चितं
तस्माच्छेव्यःसदाशंभुर्मुक्तिकामैर्मुनिः॥क्षत्रियस्यपरोपास्यईऽएवसदाहितः॥प्रसन्न
श्चैवदेवेशोविघ्नसंघविनाशकः॥पुनःसंसेवितंनैवप्रसन्नःस्यात्सदाशिवः॥इत्युक्त्वाऽर्जु
नमाऽयऽविद्यामुपादिशत्॥स्नात्वाचोदमुखोभूत्वाजप्यात्मुनिसत्तमः॥पार्थिवंचविधायैवं
ददौचऽषिपुंगवः॥प्रथमंचेऽमाराध्यतदाऽनःपुनःशिवं॥इत्युक्तोगछपुत्रापार्थऽईऽकैलासं
सुशोभनं॥जाऽत्वाचस्नात्वापेतुस्तिस्त्वाचैवतपःकुरु॥आयुधानिचसर्वाणिऽक्त्वामार्गत
दापयेत्॥तत्रापिचप्रवक्तव्यंनियमानांयमस्यच॥अदर्शनंचैवविघ्नंचदत्वाचहितकारिणी
व्याऽिषंचतदासोवैददौतस्मैमलमुनिः॥धर्मात्मासोचसर्वेवैतिऽतुराजसत्तमः॥सिद्धिःसा
सर्वथाश्रेऽनात्रकार्य्याविचारणं॥इतिदत्वाऽिषंतेव्यासश्चांतरधीयत॥तेसर्वेपांऽवा

स्तेवैदृष्ट्वावैनिश्चयंकृत्वाः कार्यंस्वकंवेत्तातेऽस्तितेनेनिरेषुदा इतिमत्वार्जुनेनैवविरलेसौ
म्यकानराः त्र्यनिछतोनतत्रैवप्रेषयामासरंगतः द्रौपदीदुःखसंयुक्तानेत्राभ्यांनिरुध्य
च उवाचेतिसुजेराजन्त्वयाकार्यप्रयत्नतः तेत्रातरेविसृज्यैनमर्जुनंचतुराग्रयं अत्स
तदुःखमापन्नानित्यंपंचएवच स्थितास्तत्रवदंतिस्मश्रूयतांऋषिसत्तमाः दुःखेषि
प्रियसंगोवैनदुःखायप्रकल्पते वियोगेदृश्यतेतत्रकृथंधैर्यंनवेदिह कर्वस्चैवंतदादुः
खेऋषिवर्यसमागतः तंनत्वाचैवसंपूज्यदत्वासनंचोब्रवीत श्रूयतांऋषिश्रेष्ठवदुः
खदग्धावयंप्रभो दग्धानेतेचसंप्राप्यान्देवरमंगताः कियत्कालंत्वयाचैवदुःखनाशाय
वैप्रभो इत्युक्तःसऋषिश्रेष्ठोह्यवसन्नसुखायवै कथाभिर्विविधाभिश्चतदुःखंनोदयन्न
दा वार्त्तायांक्रियमाणायांधर्मराजोब्रवीदिदं धर्मोवाच श्रूयतेऋषिश्रेष्ठो
सिदुःखंगतिर्गतानम एछानित्यंनलाभेकथनीयंत्वयाप्रभो ईदृशंचैवदुःखंहिपुरा

मानंतकैश्चन वयमेवपरंदुःखंराजनेनापिकश्चन इतिदृष्ट्वाऋषिश्रेष्ठःप्रत्युवाच
पुनस्तदा श्रूयतांधर्मराजोसितवदुःखंनकिंचन नैषधोनलोयापत्पुर्नलस्यासितेजसः
ऋतुपर्णस्यराजर्षेरासीत्सैवाप्पपांडवाः यज्ञार्तेवर्त्तितुंनैवशक्यतेसांप्रतंमया नारीरंतुं
स्वशक्तिंचमत्वात्वांप्रेत्यायुतां येनेदंचधनंतेनप्राप्तेवनसंश्रयः प्रथमंमात्रगर्भेवै
जातस्यदुःखसंभवः ततोविद्यौवनेकामान्प्रप्यतादुःखरूपिणः गतागतैर्दिनस्यैवकार्य
नारैरनेकशः मनसिहर्षयुक्तोसौजगामाचलपुत्रकं तत्रगत्वाचगंगायाः समीपसुंदरः
स्थलं त्र्यशोककाननंयत्रतिष्ठतेस्वर्गपुत्रकं तत्रतत्तोस्वयंस्नात्वात्वाचगुरुपादकौ
यथोपदिष्टंवेधादितथाचैवाकरोत्स्वयं पुनश्चपार्थिवंस्थाप्यसुंदरंसमसूत्रकं तदग्रेच
जपंकुर्वन्तेजोराशिसपुत्रकं त्रिकाल्यंचैवसंस्नातःपूजनंविविधंतदा चकारोपासनंतत्र
करेरेवमरुत्मनः तस्यैवशिरसस्तेजोनिसृतंतच्चराक्षदा दृष्ट्वानयंसमापन्नाःप्रविष्टश्च

कदाग्रहं ॥ इत्युक्त्वा ते च विचार्यैवं कथयंतो ययुर्द्विजाः ॥ ततस्ते ऽवैगतास्तत्र यत्रास्ते देवसत्त
मः ॥ ॥ देवगणा ऊचुः ॥ ॥ देवो वायस्त्विष्ट्येव सूर्यो वाथ विजावसुः ॥ तपस्तप्यति वेगेन
जानीमोयपावने ॥ तस्यैव तेजसादग्धा आगतास्तव संनिधौ ॥ इत्युक्तैस्तैः सर्वतालापुत्र
चिकार्वितं ॥ सोपयातस्तमस्तत्रैवयत्रतेश्रयतांततः ॥ प्रेषयामास देवेंद्रो ऽप्सरो रागणांगणा
न्च ॥ तैर्गत्वा चैव तत्रैव यदिधिवद्वर्तितं ॥ तत्सर्वं च कृतं तैस्तु श्रुत्वार्जुनस्त्वतितो नस्ति रास्ता
नावं चलांस्तं च त्रांगनादर्शनं तथा ॥ वचनैस्तैश्च संतोष्य च कुरुस्त्रकरादिभिः ॥ तथापि
वतितौनैवतांगस्यैवमादिह ॥ आह्लणेनरयाच्यासोनत्वा तत्रैवचत्वया ॥ जगामजटिलो
रुस्तेधत्वायष्टिंचजर्जरः ॥ गच्चतीन्द्रायंचपतस्मैनपदेपदे ॥ तमागततदादृष्ट्वापूजां
चक्रतवानस्त्वयं ॥ स्थितोग्रेचस्तुतिंकृत्वाकृगतोसिवदाधुना ॥ इत्युक्तस्तुरुरिःसोपिधैर्य
कृत्वाब्रवीद्वचः ॥ ॥ विप्रोवाच ॥ ॥ नवैवयंसिद्धोस्मोनकिंतपस्यसिसांप्रतं ॥ मुक्त्यर्थंन

जयार्थंहिसर्वथातपएवते ॥ इतिएतत्तदातेनसर्वंसंवेदितंपुनः ॥ इंद्रःश्रुत्वापुनर्वाक्यमु
वाचश्रूयतांतया युक्तेनक्रियतेयैवसुखंस्वप्नसमंमते ॥ तदर्थंनत्वोमुक्तंपुनर्यंकुरुसां
प्रतं ॥ इंद्रश्चसुखदातावैमुक्तिदातानवेतिहि ॥ तस्मात्त्वंसर्वथादेवंमेहंकर्तुंसमर्हसि ॥ इ
त्येतद्वचनंश्रुत्वाक्रोधंचक्रेर्जुनस्तदा ॥ उवाचार्थिनचमुनयोर्थीकिमर्थंजापसेधुना ॥ अ
र्जुनोवाच ॥ व्यासस्यवचनेनैवक्रियतेतपईदृशं ॥ तोऽहंकिमर्थंनापातपिल्लमिहसि ॥
इत्युक्तः सप्रसन्नोवैरूपमकृतसुंदरं ॥ सोपकरणसंयुक्तंदर्शयामासवैतदा ॥ इत्येवंचत
दादृष्ट्वाजग्मितश्चार्जुनस्तदा ॥ इंद्रस्तंचसमाभाष्यपुनरेववचोब्रवीत् ॥ धन्योसिकृतकृ
त्योसिसुस्थिरंहिमनस्तव ॥ बलिष्ठाःशस्त्रवस्तेचदुर्योधनपुरःसराः ॥ द्रोणोजीष्मश्चकर्
णश्चतेसर्वेदुर्जयामताः ॥ तमासाद्यात्वयायुद्धेसर्वथाचहितेशृणु ॥ एतद्ध्यंसमाकर्तुं
समर्थःकश्चनाधुना ॥ सर्वंकर्तुंसमर्थास्तेमुक्तिमुक्तिफलप्रदः ॥ अतध्वेचब्रह्मचार्वि

ष्णुः सर्ववरप्रदः ॥ अन्ये च विषवो ये च ते सर्वे शिवपूजकाः ॥ अद्य प्रभृति मन्मंत्रं हित्वा चै
व शिवं भज ॥ पार्थिवेन विधानेन ध्यानेनैव शिवस्य च ॥ उपचारैरनेकैश्च सर्वभावेन भारत
सिद्धिः स्यादचलातेद्य नात्र कार्या विचारणा ॥ इत्युक्त्वा च चरान् सर्वान् समाहूयाब्रवीदिदं
सावधानतया स्थेयमेतस्य रक्षणे ध्रुवं ॥ राजन् त्वया प्रसादश्च न कर्त्तव्यः कदाचन ॥ श्रेयसां
बहवो विघ्ना भवंति राजसत्तम ॥ धैर्यं च वर्त्तते द्यैव तथैव रक्षतां त्वया ॥ शिवः सम्यक् फलं तु
भ्यं दास्यते नात्र संशयः ॥ इति दत्वा वरं तस्मै जगाम याचनं स्वकं ॥ अर्जुनोपि तपस्तेपे शिवमु
द्दिश्य वै तदा ॥ ॥ इति शिवपुराणे अर्जुनतपवर्णनो नामाध्यायः ॥ ७० ॥ ॥ सूत उवाच
स्नानं च विधिवत्कृत्वा न्यासादि विधिवत्तदा ॥ ध्यानं तंत्रांतरोक्तं च व्यासोक्तं तथा करोत् ॥ एक
पादतलेनैव तिष्ठन्मुनिवरो यथा ॥ सूर्ये दृष्टिं निबोध्यैव मंत्रमावर्त्तयन् स्थितः ॥ तपस्तेजय ए
वासीत्यथा देवा विसिस्मयुः ॥ पुनश्चैव शिवा यात्तास्तदर्थे तप आहितं ॥ यदिच्छसि नरः सोयं

किं न यच्छसि वै प्रभो ॥ इत्युक्त्वा च स्तुतिं चक्रुर्विविधां देवतास्तदा ॥ तदीयं च वचः श्रुत्वा शि
वो वचनमब्रवीत् ॥ गम्यतां च करिष्यामि कार्यं वो माचिरं यतः ॥ परागत्य गतस्ते वै निश्चयं
परमं गताः ॥ एतस्मिन्नंतरे दैत्यो मुको नाम समागतः ॥ शौकरं रूपमास्थाय प्रेषितश्च दुरात्म
ना ॥ दुर्योधनेन विप्रेंद्रा रापेतुश्चार्जुनं प्रति ॥ यत्रार्जुनश्च तिष्ठेत्ततो न मार्गेण वै तदा ॥ शृंगं च
पर्वतस्यैव उत्पाद्य प्राक्षिपत्तदा ॥ शब्दं च विविधं कुर्वंशीघ्रवेगेन संयुतः ॥ अर्जुनोपि च तं
दृष्ट्वा विचारयत्यरोह्यभूत् ॥ कोयं वा कुत आयाति क्रूरकर्मा च दृश्यते ॥ ममातिष्ठं ध्रुवं कर्त्तुं
समागच्छति मे दधुः ॥ मम चित्ते समायाति शत्रुरेव न संशयः ॥ इति चेतसि चिंत्यैव विचचार
महामनाः ॥ बहवो मे हता पूर्वं दैत्याश्च दानवा ध्रुवं ॥ तदीयं कश्चिदायाति वैरं शोधयितुं पुनः ॥
अथवा च सखा कश्चित् दुर्योधनसुखावहः ॥ यस्मिन् दृष्टे प्रसीदेच मनः सहितमाचरेत्
यस्मिन् दृष्टे च कलुषं तदा शत्रुं विनिर्दिशेत् ॥ आचारः कुलमाख्याति वपुराख्याति भोजनं ॥

वचनेऽस्तमाख्यातिस्तेरुक्माख्यातिलोचनं ॥ ख्याकारेण तदाग्रस्ता चेष्टयानाक्षितैरथ म
नसश्च तथारुद्रा ज्ञायतेऽतर्गतेपुनः ॥ उज्ज्वलेसरजेचैव वक्त्रमारक्तमेव च नेत्रे चतुर्वि
धोक्तस्तनावाश्यतुर्विधाः ॥ उज्ज्वलेमित्रसंयोगे सरजेपुत्रदर्शने वक्त्रेचकाग्निनी योगे
चारक्तेग्राहुदर्शने ॥ तस्मिन्मनुसर्वाल्लिकुलुषाणीहियाणि च ॥ अयंयानुर्नवेदेवमारणी
योनसंशयः ॥ गुरुणाचोपदिष्टेनवर्त्तेऽहं स्वदक्षया कृतव्यःसर्वयाराजन्नात्रकार्याविचा
रणा ॥ एतदर्थेचायुधानिधृतानिनौसनात्रसंशयः ॥ एवंविचार्यतत्रैव बाणंचसंधय
तःस्थितःशिवोपिचगणैःसार्द्धंत्रेरूपविधायच ॥ अर्द्धेनस्यचरक्षार्थंपरिक्षार्थंसमाग
तः ॥ बद्धकक्षश्चवस्त्रेनिर्बधाकायनरस्तदा ॥ शरीरेचेतरेरक्षाश्चधनुर्बाणयुतंवदन् ॥ राम
तूणेदृष्टेपराणध्यजगामगणसंयुतः ॥ तूणमात्रेणशिक्षानोसेनापतिरमूर्छितः ॥ मूर्छाश्च १७१
विविधाकृत्वाजगामवाहिनीपतिः ॥ रुक्मरथस्यचैसेनायाःसृष्ट्यप्रदिशोदश ॥ व्याकुलेवन

मूर्छेनव्याकुलश्चार्द्धनस्तदा ॥ सर्वतस्ताश्चयेसर्वेतेसर्वेव्याकुलास्तदा ॥ अथोकिंचन
वेदेवशिवःप्रजेकरोत्तिमे ॥ मयाचैवश्रुतंसर्वंसूतेनकथितंपुनः ॥ व्यासेनकथितंचैवस्म
त्वादेवैस्तथापुनः ॥ शिवःप्रजेकरःप्रोक्तःशिवःसुखकरस्तदा ॥ मुक्तिदश्चपरःप्रोक्तोमुक्ति
दोनात्रसंशयः ॥ तन्नामस्मरतांपुंसांकल्याणंजायतेध्रुवं ॥ अथवाकर्मणोभोगेदुःखंदुःखनवे
दिरु ॥ अथवाबलवत्तोभोगंविस्तार्यशंकरः ॥ कदाचिदिछयापापेचूर्णीकुर्यात्महेश्वरः ॥ वि
घ्नंचैवामृतंकुर्यादमृतंविषमेवच ॥ यदिछतिकरोत्येवसमर्थःकिंनिषिध्यते ॥ तथाचैवश्रुतंतस्म
ात्तच्चसमाचरेत ॥ एतेनचव्रतेनैवगरुतेनकरदृढं ॥ ततश्चैवश्रुतंतस्मात्तेनकार्यविचा
रणा ॥ श्रुतस्यकारणेमानोनवतीतिसुनिश्चितं ॥ इतिविचार्यचमयात्मत्तैर्द्धैःपुरातनैः
ज्ञाविनिश्चसदानकैरुक्मणीयंमनःस्थिरं ॥ तद्भीर्जछत्रवातिष्ठत्कारणंनिकटेपुनः ॥ निदा
घायमकुर्वंतुस्तुतिंवाऽपःसंचयंजायतोयदिजायेतशंकरःसुखदःसदा ॥ कदाचित्क्षप

रीक्षार्थं दुःखं यच्छति वै शिवः ॥ अंते सौ सुखदः प्रोक्तो दयालुत्वान्न संशयः ॥ इत्येवं चान्यथा या
वद्विचारतत्परो भवेत् ॥ तावच्च शूकरः प्राप्तो बाणस्य लक्षतावधिः ॥ शिवोपि पृष्ठतो लग्नो
ह्यायाति शूकरस्य हि ॥ तयोर्मध्ये गतोयं च मरणाय न संशयः ॥ मम भक्तं च माहात्म्याच्छिवः शी
घ्रतरं गतः ॥ एतस्मिन्समये तावत्कृतं बाणस्य मोक्षणं ॥ शिवस्य बाणपुच्छे वै ह्येतस्य च मु
खे तदा ॥ शिवस्य पुच्छतो गत्वा मुखे निसृत्य शीघ्रगः ॥ भूमौ प्रवेशं शेषस्य प्राप वक्तुं प्रियं य
था ॥ मुखे लग्नः पुच्छदेशे निसृत्य पार्श्वतो स्थितः ॥ अर्जुनस्य महाबाणबाणत्रासितपन्नगः
शूकरस्तत्क्षणं श्रेष्ठो मृतो भूमौ पपात ह ॥ देवा हर्षं परं प्रापुः पुष्पवर्षं च चक्रिरे ॥ शिवस्तुष्ट
मया ह्यासीदर्जुनः सुखतां गतः ॥ दैत्यस्य च तदा रूपं क्रूरं दृष्ट्वा च तावुभौ ॥ अर्जुनस्य विशे
षेण आश्चर्यं परमं गतः ॥ ईश्वरेण ममाथैव बुद्धिदत्ता न संशयः ॥ इति विचार्य तत्रैव तदा शि
वशिवेति च ॥ ॥ इति शिवपुराणे अर्जुनदुःखशांतिनिरूपणाध्यायः ॥ ॥७१॥ ॥ सूत०

शिवोपि च स्वभृत्यं वै प्रेषयामास सांप्रतं ॥ बाणार्थे पांडवश्रेष्ठो ह्यर्जुनः स्वागतस्तदा ॥ गणः प्रो
वाच तं तत्र किमर्थं गृह्यते त्वया ॥ बाणश्चैवास्मदीयो वै दीयतां ऋषिसत्तमाः ॥ एतस्मिन्समय
ये प्राप्तौ बाणार्थे च गणार्जुनौ ॥ अर्जुनस्तं परामर्श्य बाणं चैवाग्रहीत्तदा ॥ इत्युक्तश्चार्जुनस्तं हि व
चनं चेदमब्रवीत् ॥ अज्ञात्वा वदसि त्वं च मूर्खोसि किं वने चर ॥ बाणश्च तो मेद्य त्वदीयश्च कथं
भवेत् ॥ रेखारूपं च पिष्टानि मन्नामांकस्तथैव च ॥ त्वदीयश्च कथं जातः स्वभावो दुस्त्यजस्तव ॥
इत्येवं च तदा श्रुत्वा भिक्षोर्वाक्यमुपाददे ॥ विहस्याश्रूयतां रे त्वं किं तपस्यसि वै मृषा ॥ वेषतश्च त
पस्वी त्वं न यथार्थं प्रदृश्यते ॥ तपस्वि च कथं मिथ्याभाषणं कुरुते नरः ॥ एकाकिनं न मां विद्धि
जानीहि वाहिनीपतिं ॥ एतत्पर्वतगोप्तारं तस्य बाणोयमीदृशः ॥ सर्वलोकैकशरणः स्वामिने
स्ति परात्परः ॥ सर्वमर्थः सर्वथा कर्तुं निग्रहानुग्रहं प्रति ॥ तस्य बाणस्य वर्त्तेत योनीतश्च
त्वयाधुना ॥ अयं बाणश्च ते पार्श्वे स्थास्यते न कदाचन ॥ तपश्च क्षीयते सत्यमेतदेव मया श्रु

तं तस्माच्चतपसस्तेयज्ञविघ्नंतिफलंकुतः॥तस्माच्चपुण्यतोबाणोमोचेत्कृतघ्नतान्नवेत्॥न
मेवस्वामिन्बाणस्तवार्थेमोचितोध्रुवं॥नान्यश्चमारितस्मेनपुनर्बाणश्चरक्षितः॥अत्यंतंच
कृतघ्नोसितपःक्षुन्नतरंतथा॥सत्यंचरन्तसेसम्यक्सिद्धिंतेज्ञविघ्यति॥प्रयोजनंचेद्बाणेन
स्वामिन्मेयाच्यतोत्वया॥ईदृग्गश्चतथाबाणंदद्युःसंतेसदा॥राजाचवर्तेतेपार्श्वेकिंनै
श्वर्यात्वयाच्यतोत्वया॥प्रार्थनायोविनोवेणदास्यतेविविधंफलं॥उपकारंपरित्यज्यचापकार
सम्मीरसे॥नेतयुक्तंत्वयाचात्रक्रियतेसज्जचापले॥इत्येवंवचनेश्रुत्वापार्थोवाक्यमुपा
ददे॥शृणुचित्रंत्रवक्ष्यामिह्यसत्यंतववाघणे॥यथाज्ञातितथात्वेचज्ञानासिकिंवनेचर
अहंराज्ञावातचौरःकथंनोप्रतिभाससे॥युद्धंमैत्रीसमेकार्यंनाधमेत्किंदाचन॥तस्मात्ते
चतयास्वामिन्नविघ्यतिनवादृशः॥नानारश्चवयंश्रोकाश्चोराःश्रोकावनेचराः॥कथंयाचो रात
मयात्रीराजापिचाधमोनृणं॥त्वमेवयाचतेकिंनप्राणान्तेहंददामिच॥एवंविधाश्चव १७३
र्तीःकलत्रंचततःपरं॥पृथिवीरत्नमन्येयास्तीतिमतिर्मम॥इत्युक्तस्तंतथागत्वाजु

स्वो बाणःसंतिसरत्नानःएजातेयाचतेतयत्तद्दामीरसोव्रतं॥यदिबाणोसदाचासी त्त
दागछतेनृपः॥यद्यागमिष्यतेनर्त्तांकिमर्थंनाधसेधुना॥आगत्यचमयासार्द्धंयुद्धेजित्वाच
सोपुनः॥नीत्वाबाणंसुखंयात्वविलंबःक्रियतेकथं॥इत्येतद्वचनेश्रुत्वास्त्रीवाक्यमथाब्रवीत्
अज्ञोसित्वंस्त्रिनासीमरणंतीहसेकथं॥दृष्टिबाणंसुखेतिष्ठन्यथाकेशएवते॥इत्युक्त्वा
पुनःप्राहशृणुत्वंचवनेश्वर॥आगमिष्यतियस्त्वामीदृग्विधेफलंतदा॥सिंहश्रृगालयोर्युद्ध
पलासकरंवथा॥श्रुतंचपरसैन्यंत्वंचयथेछसितथाकुरु॥इत्युक्तस्तुगतस्तत्रयत्रास्तेवाल्मी
पतिः॥सर्वंनिवेदयामासश्रुत्वार्षभुपागतः॥आजगामससैन्येनमूकोनिस्त्ररूपधृक्॥अ
र्जुनश्चतदासेनांदृष्ट्वासन्मुखमाययौ॥पुनश्चस्त्रीवचश्चेवप्रेषयामासवेतदा॥परसैन्यत
पश्चिनपुंचबाणंव्रजाधुना॥मरणंचत्वकार्यार्थेकथमिछसिसांप्रतं॥अंतरस्तवदुःखा
र्तीःकलत्रंचततःपरं॥पृथिवीरत्नमन्येयास्तीतिमतिर्मम॥इत्युक्तस्तंतथागत्वाचार्जु

नाय निवेदितं ॥ तच्छ्रुत्वा च पुनः प्राह विपरीतं भविष्यति ॥ यद्यहं चैव ते बाणं यच्छामि च मदीयकं
कुलस्य दूषणं चाहं भवतीति न संशयः ॥ भ्रातरश्चैव दुःखार्त्ता भवेयुः सपरिग्रहाः ॥ विद्या च निः
फलास्युर्मे तस्मादागच्छ वै ध्रुवं ॥ सिंहश्चैव शृगालात्तु न भीतो विश्रुतो मया ॥ इत्युक्तस्तं पुनर्गत्वा
तदुक्तं च निवेदितं ॥ सोपि हर्षसमायुक्तो युद्धं चक्रे सुदारुणं ॥ गणाश्च विविधैस्तत्र आयुधैस्तमा
पीडयन् ॥ शिवोपि स्वगणान्प्रेय युद्धं चक्रे तिदारुणं ॥ अर्जुनश्च दृढं तत्र प्रहारं कृतवान् तदा ॥ आ
युधानि शिवश्चैव चार्जुनस्याहरत्तदा ॥ कवचं च हृतं तेन शरीरं केवलं स्थितं ॥ तदार्जुनः शिवे
नैव युद्धं मल्लसमुद्भवं ॥ चकार मेदिनी दुःखं प्राप्ता सा चलसंयुता ॥ देवा दुःखसमापन्नाः किं
भविष्यति हा पुनः ॥ एतस्मिन्नंतरे देवः शिवो गणपरिव्रतः ॥ युद्धं चकार तत्रस्थं अर्जुनश्च तथा
करोत् ॥ उदीयदीयतौ युद्धं चक्रतुर्देवपार्थिवौ ॥ अर्जुनोप्यंतरं ज्ञात्वा दधौ वै पादयोः शिवं ॥ धृ
त्वा पादौ तदा सो वै भ्रामयामास शंकरं ॥ पश्यत्वदर्शनार्थाय शिवेनैव कृतं तदा पश्चाद्विहस्य

तत्रैव शंकरो रूपमद्भुतं ॥ दर्शयामास हस्ताच्च चलित्वा सुंदरः शुभः ॥ यथोक्तं वेदशास्त्रेषु पुराणं
पुरुषोत्तमं ॥ तं दृष्ट्वा च ऋषिश्रेष्ठ अर्जुनो लज्जितस्तदा ॥ अहो शिवः शिवः सोयं यो मे भक्त्या हृदि धृतः
त्रिलोकीशः स्वयं साक्षात्तदा कृतं किं मयाधुना ॥ मायावती देवी माया मायिनामपि मोहिनी किं कृ
तं रूपमाच्छाद्य प्रभुणा छलितो ह्यहं ॥ इति विचार्य क्षंतव्यं क्षंतव्यं च पुनः पुनः ॥ उवाच पादयोस्तस्य
पतित्वा शंकरस्य च ॥ शंकरोपि महादेवः मूढेनैव मया कृतं ॥ इति श्रुत्वा तदा हास्यं कृत्वा च शंकरः
पुनः अर्जुनं च समाश्वास्य भक्तोसि पुत्रसत्तम ॥ परिक्षार्थं मया तेद्य कृतमेवं शुभो भव ॥ इत्युक्त्वा
तं च हस्ताभ्यामुत्थायार्जुनमेव च ॥ विलज्जं कारयामास स्वगणैश्च सप्तोत्तमैः ॥ पुनः शिवोर्जुनं
प्राह प्रसन्नोस्मि वरं शृणु ॥ प्रहारैस्ताडनं तेद्य पूजनं मानितं मया ॥ इच्छया च कृतं मेद्य नापराध
स्तवाधुना ॥ नादेयं विद्यते तुभ्यं यदिच्छसि वृणुष्व तत् ॥ शत्रुष्वथ यशो राजन् क्षापयानाद्भुतं
कृतं ॥ दुःखं नैव प्रकर्तव्यं वक्तव्यं च त्यजाधुना ॥ इत्युक्तश्च शिवस्तत्र सावधानतया स्थितः ॥

नुवाच शंकरं सोपि प्रभुणा किं समीहतं ॥ वर्णनीयं मया देव कृपालुत्वं सदाशिव ॥ इत्युक्त्वा च स्तु
तिं तस्य चकार वेदसंमतं ॥ ॥ अर्जुनोवाच ॥ ॥ नमस्ते देवदेवेश कैलासवासिने नमः स
दाशिवाय नमस्तुभ्यं पंचवक्त्राय ते नमः ॥ कपर्दिने नमस्तुभ्यं त्रिनेत्राय नमोस्तु ते ॥ कुलिने ते न
मस्तेस्तु सद्योजाताय ते नमः ॥ वृषध्वज नमस्तेस्तु वामांगगिरिजाय च ॥ दशभुजाय ते देव
नमस्ते परमात्मने ॥ डमरुकपालहस्ताय नमस्ते रूढमालिने ॥ शुद्धस्फटिकसंकाशं कर्पूर
गौरकाय च ॥ पिनाकपाणये तुभ्यं त्रिशूलवरधारिणे ॥ व्याघ्रचर्मोत्तरीयाय गजांबरविधारि
णे ॥ नागांगाय नमस्तुभ्यं गंगाधर नमोस्तु ते ॥ सुपादाय नमस्तेस्तु ह्यारक्तवरणाय च ॥ नंदादिग
णसेव्याय सिद्धिसेव्याय ते नमः ॥ गणेशमुख्यपुत्राय कार्त्तिकानुगताय च ॥ भुक्तिदाय न
मस्तेस्तु मुक्तिदाय नमोस्तु ते ॥ अगुणाय नमस्तेस्तु सगुणाय नमोस्तु ते ॥ यत्किंचिद्दृश्यते रू
पं तत्तेजस्तावकं स्मृतं ॥ तव गुणाश्च संख्यातुं तु वेद न प्रभवंति ह ॥ किं पुनर्मंदबुद्धिश्च वर्ण

यामि सदाशिव ॥ योसि सोसि नमस्तेस्तु कृपां कर्तुमिहार्हसि ॥ इति श्रुत्वा वचः शंभुः प्रोवा
चार्जुनमेव च ॥ किं वरं न वृणोषि त्वं शीघ्रं वद ददामि ते ॥ इत्युक्तश्चार्जुनस्तत्र प्रणिपत्य स
दाशिवं ॥ उवाच व्रीयते त्वं च ह्यंतर्यामितया स्थित ॥ तथापि वर्ण्यते मेद्य श्रूयतां च त्वया प्रभो ॥ श
त्रूणां संकटं यच्च तद्गतं संकटं तव ॥ दर्शनाद्देव चात्र त्वां सर्वां सिद्धिं शुभां मतां ॥ सिद्धिं देहि महा
देव किमतः परमुत्तमं ॥ इत्युक्त्वा तं नमस्कृत्य बद्धांजलिपुरःस्थितः ॥ शिवोपि तं तदा भूतं ज्ञात्वा
स्वीयं तदा सदात् ॥ अस्त्रं पाशुपतं नाम ब्रह्मांडे दुर्जयं परैः ॥ तस्मै ददौ तदा शंभुर्दुर्जयस्तं भवि
ष्यति ॥ अनेन सर्वशत्रूणां जयं कृत्वा शुभं कुरु ॥ कृष्णं च कथयिष्यामि सहायं ते करिष्यति ॥
कृष्णो ममांशभूतश्च इत्येकार्यं करिष्यति ॥ राज्यं निःकंटकं प्राप्य धर्मान्नानाविधान्कुरु ॥ हस्तं
च शिरसि धृत्वा पूजयित्वार्जुनं तदा ॥ हृदयालिंगनं कृत्वा भक्तवत्सलतां पुनः ॥ दर्शयित्वा जयं द
त्वा पूजितोंतरधीयत ॥ देवदुंदुभयोर्नेदुः पुष्पवृष्टिपपात ह ॥ अप्सरसां तथा नृत्यं जातं तत्र रू

षीश्वराः ॥ देवाश्चैव तदा सर्वे चायुधानि ददुः स्वयं ॥ पूजितश्च वरं प्राप्य कियत्कालं दिवि
स्थितः ॥ तदादिष्टश्च पार्थो सौ भ्रातॄनेवागमत्तदा ॥ सर्वे ते भ्रातरश्चैव तन्वः प्राणमिवागतं ॥ मि
लित्वा च मुखं प्रापुर्द्रौपदी सुखमालभेत् ॥ आश्रमे पुष्पवृष्टिश्च चंदनेन समन्विता ॥ पपाता
शुभनाशार्थं तेषां चैव महात्मनां ॥ तत्रायं शुभवर्त्तांतं श्रुत्वा हर्षमुपागमन् ॥ शिवं परं च संतु
ष्टं पांडवाः सर्व एव हि ॥ धन्यश्च शंकरश्चैव नमस्कृत्य शिवं मुदा ॥ अवधित्वं गतं ज्ञात्वा जय
श्चैव भविष्यति ॥ एतस्मिन्नंतरे कृष्णः श्रुत्वार्जुनसमागतं ॥ मिलनाय समायातः श्रुत्वा सु
खमुपागतः ॥ अतश्चैव मया प्रोक्तः शंकरः सर्वदुःखहा ॥ मया च सेव्यते सोपि भवद्भिश्चापि से
व्यतां ॥ इत्युक्त्वा च गतस्तत्र कृष्णश्च द्वारकां प्रति ॥ ॥ इति शिवपुराणे अर्जुनवरप्रदाना
ध्यायः ॥ ७२ ॥ ॥ ऋषय ऊचुः ॥ ॥ सूत सूत महाभाग साधूक्तं हि त्वयानघ ॥ विधानं पा
र्थिवस्यैव यथोक्तं ऋषिणा तदा अर्जुनाय सुखस्यार्थं तत्त्वं ब्रूहि विशेषतः ॥ ॥ सूत उवाच ॥

सम्यक्पृष्टं ऋषिश्रेष्ठास्तदहं कथयामि वः ॥ यदा दुःखं त्वसाध्यं च जायते ऋषिसत्तमाः ॥ दुःखस्य
नाशनायैव सुखार्थं मुक्तये यथा ॥ सद्गुरुं च प्रपद्ये च मंत्रं प्राप्य पुनस्ततः ॥ विश्वासं परमं लब्ध्वा
शिवस्याराधनं चरेत् ॥ ब्राह्मे मुहूर्त्ते चोत्थाय नत्वा च गुरुपादुकां ॥ शिवस्यैवाथवा नाम तीर्था
नां वा महात्मनः ॥ शुद्धिं कलेवरस्यैव कृत्वा मलविसर्जनं ॥ दंतधावनादि कृत्वा क्षाल्यं मुखं स्नानं
समाचरेत् ॥ आचमनं च ततः कृत्वा मंत्रैर्नानापदैरपि ॥ तिलकं च ततः प्रोक्तं द्वादशांगेषु शोभनं
स्वशाखोक्तं तथा नित्यं संपाद्य विधिवत्पुनः ॥ भूतशुद्धिं विधायादौ प्रतिष्ठां प्राणसंभवां ॥ कृत्वा
च सेवनं तस्य सिद्धिभाक् जायते नरः ॥ मंत्रेणानेन संपाद्य तत्सर्वं ऋषिसत्तमाः ॥ ज्योतिरूपी स
